देवगोष्ठी

अनुक्रमणिका

देवगोष्ठी

देवगोष्ठी

धन्यवादः

सुभाषः


स्मराम्यहं नाम विभुं पवित्रम्,
साफल्यदं सच्चिद्व[illegible]त्मरूपम्।
कृपाम्बुभिर्यस्य रसा[illegible]दा,
प्रकाश्यते [illegible] देवगोष्ठी ॥ १

सुकीर्त्यते साधु यशो गुरूणां,
येषां प्रसादात् जटयोगतश्च।
प्रारभ्यते पत्रमिदं सुसारं,
त्रैमासिकं चारुकलाभिरम्यम् ॥ २

ददाम्यहं धन्यवचः सविनयः
स्नेहार्द्र-सन्मंगल-कामनाभिः।
येषां सुयोगैश्च बहुप्रशस्यै,
रारभ्यते पत्रमिदं समोदम् ॥ ३

देवगोष्ठी

ओ३म



-पीकू-


देवगोष्ठी

देवगोष्ठी-प्रवर्तताम्

ऋषिभिर्मुनिभिर्गीता, पुनीता स्वर्ग संक्रमा।
प्रशस्ता देव विप्राणां, देवगोष्ठी प्रवर्तताम्॥१॥
आत्मनः कर्म धर्मश्च, शिक्षयन्ती जनान् सदा
शास्त्रालोचन भूयिष्ठा देवगोष्ठी प्रवर्तताम्॥२॥
वैदिकी सभ्यता नित्यं, धर्मश्च प्रसरेदिह।
इत्युद्देश्य प्रवृत्ता सा देवगोष्ठी प्रवर्तताम्॥३॥
प्रसरन्ती सुधास्पन्दं, फलत· प्रवदामिनी,
ज्ञान विज्ञान निःश्रेणी देवगोष्ठी प्रवर्तताम्॥४॥
यस्यां नित्यं समभ्यासे. पाटवं संस्कृते [illegible]।
जायते वर्णिनां सात्र देवगोष्ठी प्रवर्तताम्॥५॥

विबुधप्रवरो-
— धर्मदेवो वेदवाचस्पतिः

देवगोष्ठी



देवगोष्ठी


दयानन्द  स्तुतिः

समर्पितं जीवनमेव सर्वम्,
परोपकारेऽभ्युदये समेषाम् !
नैच्छत् कदाचित् स्वसुखं न कीर्तिं
वन्द्यः स मे श्लाघ्यतमो महर्षिः ॥

निखाय पाखण्डविखण्डनं ध्वजम्,
चचार वेदारिषु योऽहि निर्भयः ।
पराजिता येन समस्तनास्तिकाः,
कुतो न वन्द्यः स महर्षिराड् गुरुः ॥

सुभाषचन्द्रः

देवगोष्ठी



उर्वशी

देवगोष्ठी

प्रजातन्त्रप्रणाली श्रेयसी

– धर्मवीरः –

एतस्मिन् वैज्ञानिक-युगे केचित् समालोचकाः एतादृशीम् आशङ्काम् कुर्वन्ति यत् आविष्कृतानां यन्त्राणां कारणात् लोकानां स्वच्छन्दाचारस्य कल्याणमङ्गलयोः ह्रासो भवितुं शक्नोति! एतादृश्याम् अवस्थायाम् एतादृश्याः प्रणाल्याः आवश्यकता वर्तते यया आसां उच्छृङ्खलवृत्तीनां यासाम् सुधार-द्वारेण प्रजायाः स्वच्छन्दस्य च रक्षणं भवेत्! अतो विचारणीयमिदं वर्तते यत् कया शासन प्रणाल्या लोकानां रक्षणं भविष्यति!

देवगोष्ठी

विचारानन्तरमस्माभिः ज्ञायते यत् प्रजातन्त्र-प्रणालीव अस्मिन् युगे लोक-संरक्षणाय राष्ट्रोत्थानाय च उचिता विद्यते । यतोहि अस्यां प्रणाल्यां शासकाः स्वेच्छाचारिणो न भवन्ति यथा राजतन्त्र-प्रणाल्याम् । राजतन्त्र प्रणाल्यां राजा स्वेच्छाचारी भवति अतएव राज्ञः विचारा एव सर्वोपरि वर्तन्ते । परं प्रजातन्त्र प्रणाल्यां प्रजा-विचाराणामादरो — भवति । यतोहि नृपतिः स्वात्मानं एकतमं प्रजासु मन्यते ।

प्रजातन्त्र-प्रणाली एव एतादृशी वर्तते यस्यां शासिताः जना अपि स्वानपराधी-नान् न मन्यन्ते । शासितेष्वपि तेषु समानताया भ्रातृत्व भावनायाश्च विचारो विवर्धते ।

देवगोष्ठी

आसीत् पत्रं — "The Government of the people for the people & by the people.

मम मनसि सन्ति भूयांसः प्रीति आदर बुद्धि वर्तन्ते ये खलुः राज्य तन्त्र प्रणाल्यन् सह राज्यं अनुशासन् एवमेव देशस्य कल्याणञ्च ! यथा सम्राट् चन्द्रगुप्त प्रियदर्शी अशोक प्रभृतयः ! न ननु अत्र कोऽपि सन्देहो यत् इमे राजानः स्व समये लोकानां देशस्य च हिताय कार्यं न कृतवन्तः । परमस्मादेव कारणात् राज्यतन्त्रो प्रणाली सम्प्रति विद्यते एवमपि वयं वहु न प्रभवामः । यतो हि चन्द्रगुप्ताशोक समये या उन्नति रभूत् देशस्य सा तु सांशा सुज्ञान कारणादेवाभूत् ! परं पश्चाच्च पश्यामो यत् -- हर्षवर्धन मृत्युरनन्तर देशस्य अकल्याण

देवगोष्ठी

जोनेनेवकोठेन कविवरेण "जापसी महोदयेन" उक्तमस्ति यत् -: लोकतन्त्रं प्रणाली सा वर्तते यस्यां अधिकाराणां, परिस्थितयः जनभावनायाश्च समानता भवति। इयं प्रणाली वर्गहीना भेदभावरहिता च वर्तते। अनेन स्पष्टं प्रतीयते यत् अस्यां प्रणाल्यां जनैः सामाजिकाधिकाराणां प्रयोगः क्रियते।

प्राचीनकालस्य विदुषः श्रीमतः "अरस्तू महोदयस्य" विचारानुसारं "प्रजातन्त्रं प्रणाल्यास्ता तन्त्रं स्वभावेन" यदा शासनप्रणाल्याः उत्तरदायित्वं अनेकेषां लोकानां हस्तेषु भवति तदा इयं प्रणाली भवति।" परमाधुनिक विचारानुसारं प्रजा स्वयं एव शासनं करोति। सर्वकार्येषु प्रजायाः विचाराणां प्रतीकमात्रं भवति। लिंकन महोदयेन निगदितं

देवगोष्ठी

देव अमृत! चेत् प्रजातन्त्र प्रणाल्यानुसारं नृपः भविष्यति तर्हि एतादृशावस्था उत्पन्नैव न भविष्यति। यतोहि एकस्य मूर्खोऽनन्तरम् अन्यः विद्वान् राजसिंहासनम् लब्धोति। परं राजतन्त्र प्रणाल्यामेवं न वर्तते। तत्र तु भाग्य वशात् मतिमान् राजा भविष्यति तर्हि कल्याणं भवेत् न तु मूर्ख राज हेतोः अधःपतनमेव। परं प्रजातन्त्र प्रणाल्यां तु निर्वाचकैः निर्वाचितः श्रेष्ठः पुरुष एव राज्यं करोति। वेदेष्वपि संकेत समीप वर्तते यत् शासकाः प्रजाभिः निर्वाचिता एव भवेयुः। यदि शासकाः अयोग्याः वर्तन्ते तर्हि प्रजास्तान् एव पदात् अधिकारात् च्युतं कर्तुं अपि समर्थाः वर्तन्ते। —

"आत्वाहार्षमन्तरेधि ध्रुवस्तिष्ठाविचाचलिः।

देवगोष्ठी

विधास्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि-भ्रशत्"॥ अन्यच्च — "विशि राजा प्रतिष्ठितः"॥

अस्यां स्पष्टं ज्ञायते यत् प्राचीन काले ऽपि प्रजातन्त्र प्रणाल्या एव अनुकरणमासीत्।

एवं प्रजातन्त्र प्रणाली एव उचिता वर्तते। यतो हि अस्यां प्रणाल्यां राजा स्वेच्छानुसारं कार्यं कर्तुं न पारयति। सर्वे जनाः समाना विचारवन्तः भवन्ति। सर्वे जनाः स्व प्रयत्नानुसारं अधिकारं उच्च पदञ्च प्राप्तुं शक्नुवन्ति।

अनया प्रणाल्या देशस्य सर्वांगीणी उन्नतिर्भवति एवं राजतन्त्र प्रणाल्यां भीषण दुष्परिणामाः वर्तन्ते। अतएव प्रजातन्त्र प्रणाल्येव सर्वश्रेष्ठा वर्तते। इत्येवास्ति मे सुदृढं मतम्। इत्यलम्। धर्मवीरः

देवगोष्ठी

किं भवन्तः जानन्ति

यत् →

१ → १८०६ तमे वत्सरे प्रथम: भारतीयध्वजा: निर्मित आसीत् ॥ →

२ → १८२८ वत्सरे प्रथममाकाशवाणीकेन्द्रं मद्रास-नगरे संस्थापितम् ॥ →

३ → संसारस्य विशालतम: प्रासाद: रोमदेशे विद्यते, "वैटाकिन" इति नाम्ना यो हि प्रसिद्ध: ॥

४ → जगत्प्रसिद्धो विशालतम: अद्भुतालय: लन्दननगरे वरीवर्ति ॥ →

५ → १८०६ तमे खीष्टाब्दे महाराज्ञा: "विक्टोरिया"-या: मूर्ति: कलकत्तानगरे जनै त्रोटितासीत् ॥

— धर्मदीप: —

देवगोष्ठी



देवगोष्ठी

सुधीन्द्र इन्द्र विद्यावाचस्पति

समयसैकते महापुरुषाः यानि स्व-चरणचिह्नानि विमुच्य प्रयान्ति तान्येव चरणचिह्नानि अनुगम्य साधारण जना अपि स्व-जीवनं सफलं कर्तुमिच्छन्ति। एवंविधानां महा-पुरुषाणां श्रेण्यामेको विद्वज्जन वन्दनीयो धीराणामग्रणी. प्रातः स्मरणीयः श्रीमान् इन्द्र नामधेयो नेता आसीत्।

श्रद्धेयजनानां श्रद्धापात्रं श्रद्धायाः-मूर्तिः स्वयं श्रद्धेयः स्वामि श्रद्धानन्दो महाभागोऽस्य पिता आसीत्। स चात्मानुरूपं सर्व-गुण सम्पन्नं पुत्ररत्नं प्राप। बाल्यादेव च सोऽतीव प्रतिभा सम्पन्न आसीत्। प्राप्ते च षष्ठे वर्षे स्वामिश्रद्धानन्द महोदयेन सर्वतः प्राक् यम नियमादिना संयमितं नियन्त्रितञ्च गुरुकुलस्य कठोर-जीवनं यापयितुमयं गुरुकुलं प्रेषितः। तत्रायं चतुर्दश-वर्ष-पर्यन्तं स्व-शिक्षाकालं यापयित्वा वेदालङ्कार इति उपाधिना विभूषितः। अयं गुरुकुलस्य

देवगोष्ठी

प्रथमः स्नातक आसीत् । सुरधुन्यास्तीरे स्थिते परम पावने गुरुकुले स्थित्वाऽनेन सर्वेषामेव विषयाणामध्ययनं कृतम् । हिन्दी माध्यमेन संस्कृत-साहित्यं, वैदिक-साहित्यं, दर्शन-शास्त्रम्, आर्य भाषा-साहित्यं, गणित शास्त्रं, आंग्ल भाषा साहित्यञ्चाप्यधीतम् । गङ्गायास्तीरे निर्जन वनेषु उन्नतोपत्यकासु प्रकृत्याः क्रोडे च क्रीडयन्नयमतीव साहसिको बभूव । अधीत-सकलशास्त्रेण स्नातकेन यानेन विद्यावाचस्पति परीक्षापि उत्तीर्णा । स्व शिक्षा काले एव अनेन पत्रकारितायाः सम्पूर्णं ज्ञानं प्राप्तम् । आर्यभाषाऽस्य प्रिया भाषा आसीत् । आर्यभाषायां बाल्यादेवायं निबन्धान् लिखति स्म । भाषणेऽपि च बाल्यादेव कुशल आसीत् । स बालकः कथं न सर्वगुणसम्पन्नः स्यात्, यस्य पितृचरणाः सर्वगुणसम्पन्ना आसन् । नैपोलियन नाम्नो विजयिनः चरित्रमपि स्व शिक्षाकालेऽस्व लिखितमनेन ।

अतिक्रान्तेषु च दिवसेषु सम्पूर्णे

देवगोष्ठी

स्वाध्ययनं परिसमाप्य देहली नाम नगर्यां-मयं निवस्तुमारेभे। भारत देशस्य राजधानी देहली एवास्य कार्यक्षेत्रमासीत्। अत्रैव स्थित्वाऽनेन स्व-देशाय स्व-धर्माय मनसा वाचा कर्मणा च कार्यं कृतम्। पत्रकारितायाः क्षेत्रेऽयं प्रथमः पत्रकार आसीत्। येन "वीर अर्जुन" नाम पत्रं सम्पादितं, संवर्धितञ्च। यदास्माकं मातृभूमिः पराधीनतायाः श्रृंखलायां परावृता आसीत्। यदा च स्वतन्त्ररूपेण वचनात् लेखनाच्च भारतीयाः बिभ्यति स्म। तस्मिन् कालेऽनेन देहली नगर्यां पत्रकारितायाः नेतृत्वं कृतम्। अत एव सर्वे राजधानी वासिनः न केवलं राजधानी-वासिनः अपितु सर्वे देशवासिनः एतं सम्यक् जानन्ति, श्रद्धया च चरण कमलयोः नत मस्तकाः जायन्ते। आर्य भाषाऽस्य प्रिया भाषा आसीत्। अस्य भाषा संस्कृत निष्ठा प्रभाव शालिनी चासीत्। अस्य लेखन्याः प्रभावेण प्रभाविता जनाः मुग्धाः जायन्ते स्म। अस्योजस्विनी भाषा देश-

देवगोष्ठी

वासिनः प्रेरयति । भाषणेऽप्ययं कुशल आसीत् । अस्य मुखकमले सर्वदा सरस्वती निवसति स्म । न कोऽप्येतादृशः पुरुषः परिलक्ष्यते पृथ्वीतले योऽस्य भाषणं श्रुत्वा प्रभावितो नाऽभूत् ।

अयं देशस्य लेखकेषु एकोऽद्वितीयः लेखक आसीत् । साहित्य क्षेत्रेऽप्यनेन देशस्य महती सेवा कृता । अनेन अनेकानि पुस्तकानि लिखितानि । तेषु पुस्तकेषु अस्याऽन्तर्भावनायाः दिग्दर्शनं भवति । हिन्दी साहित्यस्योन्नत्यां येषां साहित्यकानां योगो वर्तते । तेष्वयमग्रगण्यः । यावज्जीविष्यन्त्यार्यभाषा आर्य भाषा भाषिणः तं न विस्मरिष्यन्ति ।

राजनीति क्षेत्रेऽप्यनेन स्पृहणीयं कार्यं कृतम् । अष्ट-वर्ष पर्यन्तमयं संसत्-सदस्य आसीत् । अनेन न कदापि स्व राष्ट्र-भाषायाः गौरवं परिक्षीणं कृतम् । संसत् भवने न कदाप्यांगलभाषायाः प्रयोगः कृतः । सर्वदैवार्य-भाषायामेव अवदत् । एतानि कार्याणि कुर्वन्नपि

देवगोष्ठी

अयं गुरुकुलस्योपकुलपतिपदमपि सुशोभयामास। अस्य नेतृत्वे गुरुकुलेन सर्वाङ्गीणा उन्नतिः कृता।

एतादृशाः अनेके पुरुषाः परिभ्रमन्ति भूतले, ये जीवनं धारयन्ति न किमपि कुर्वन्तश्च पञ्चत्वं प्राप्नुवन्ति। परं तेषामेव जीवनं धन्यं भवति ये स्वदेशाय स्वधर्माय च स्व सर्वस्वं समर्पयन्ति। एतादृशानां पुरुषाणां मध्ये एवैनं महापुरुषं गणयन्ति गुणिगणाः। परं विचित्रा लीला परमेश्वरस्य। तस्य अनन्यायाः शक्त्याः समक्षं मानवी शक्तिः नगण्या वर्तते। यो वयमिच्छामः स न भवति। 'जातस्य हि ध्रुवो मृत्युः" इति वचनानुसारं योऽपि जगति देहं धारयति तस्य मृत्युरपि भवत्येव। अद्य देशवासिनोऽस्य महानुभावस्याभावमनुभवन्ति। परं देवलोके देवगणाः अपि तमाह्वयन्ति स्म। अत एवेन्द्रः इन्द्रलोके इन्द्रपदं सुशोभयितुमगच्छत्।

सुरेन्द्र कुमारः

देवगोष्ठी



महावीर

देवगोष्ठी



महावीर:

गोष्ठी

प्रवर्षन् वारिवाहः

श्रीमान् धर्मदेवो वेदवाचस्पतिः

पीत्वा भृशं जलधिवारि प्रपूर्णकुक्षिः
पीनोदरः परिगृहीतसुनीलतल्पः ।
पीडाप्रकर्षविषसंचयकृष्णगात्रः
नीचैः जलं वमति खिन्नमनाः पयोदः ॥



चरित्र निर्माणम्

(i) सच्चरित्रतायाः अभावे, केवलं बौद्धिकं ज्ञानम्, सौरभमयः शव इव विद्यते। —— महात्मा गान्धी


(ii) एतच्चरित्रमेव वर्तते, यद्धि आपदां दुर्भेद्येष्वपि प्राचीरेषु मार्गं रचयति। — विवेकानन्दः

(iii) चरित्रमेतादृशं हीरकं वरीवर्ति, यत्तु अखिलानपि अन्यान् पाषाणान् खण्डशः करोति। ——
बारट्न

देवगोष्ठी

— सहचिन्ता —





देवगोष्ठी



आधुनिकी शिक्षा प्रणाली

सर्वप्रथमम् एतत् विचारणीयं यत् शिक्षायाः किमुद्देश्यम् । वास्तविक रूपेण सैव शिक्षा वर्तते यया आध्यात्मिकी भौतिकी सर्वाङ्गीणोन्नति भवेत् । इदं विचार्य वयं परीक्षां कुर्मः यत् अस्मिन् समये या शिक्षा प्रणाली प्रचलिता किमियमस्माकं सर्वाङ्गीणोन्नतिं कर्तुं समर्था ?

शिक्षाया उद्देश्यं यत् सर्वे छात्राः शिक्षकाश्च सुचरित्रवन्तः स्युः । परमधुना वयं पश्यामः यत् न तु शिक्षकाः नैव च छात्राः सुचरित्रवन्तः सन्ति । छात्राणां व्यवहारं तु वयं प्रतिदिनं पश्यामः । अस्य कथनस्य न काऽपि आवश्यकता । समाजे छात्राणां न कोऽपि समादरः । इयं शिक्षा चरित्रस्य उन्नतिं कर्तुमसमर्था एव । आधुनिकाः छात्राः पितृणामपि आदरं न कुर्वन्ति का कथा पुनः गुरूणाम् ।

देवगोष्ठी

पुरुषस्य विद्वत्तायाः ज्ञानम् उचित रूपेण न भवति उचित स्थाने विदुषां पुरुषाणां आगमनं न भवति। सर्व क्षेत्रे उत्कोच प्रणाली प्रचलिता वर्तते। अस्मिन् समये तु मूर्खाः अपि जनाः उच्चपदं प्राप्नुवन्ति। मुख्य रूपेण अस्य कारणं अस्माकम् आधुनिक शिक्षा एव वर्तते।

अधुना तु शिक्षा पुस्तकेषु एव सीमिता वर्तते। सर्वेषां पुरुषाणां पठनानन्तरं एकमेवोद्देश्यं भवति यत्ते गणक पदं प्राप्नुयुः। इयं शिक्षा अस्मान् स्वकार्यं कर्तुमपि समर्थान् न करोति। आधुनिकाः बालकाः स्वल्पमपि परिश्रम साध्यं कार्यं कर्तुं स्वानादरं मन्यन्ते। सर्वे जनाः स्व प्रियां हिन्दीभाषां त्यक्त्वा आंग्लभाषाम् आदर दृष्ट्या विलोकयन्ति सर्वत्र हिन्दी भाषाया अनादरं तु भवत्येव परं [illegible]

देवगोष्ठी

[illegible] सा


तिकाध्यात्मिक रूपेण सर्वजीवोन्नतिः स्यात् ।
दि वयमस्माकं देशस्य उन्नतिमिच्छामस्तर्हि
स्याः शिक्षायाः स्वरूपे परिवर्तनं विधेयं तदास्य
स्याः शिक्षाया उद्देश्यं पूर्णं भविष्यति ॥

रामकृष्णाख्यचतुर्दशीयो
वेदमहाविद्यालयः



सुभाष १८

देवगोष्ठी



देवगोष्ठी

वीरवरः प्रतापः शिववीरश्च →

— कोविदवरोऽधर्मदेवो विद्यामार्तण्डः

यः शूरवीरेषु शिरोमणिः सन्
अदम्यमुत्साहमिहादधानः ।
नाङ्गीचकारेतरपारतन्त्र्यं,
तं श्रीप्रतापं वानता नमामः ॥
एकोऽल्पसेनोऽपि न यो वरेण्यः,
सत्क्षत्रियाणां नृमणिश्चकम्प ।
पुरः कदाचिन्मुगलाधिपानां,
तं श्रीप्रतापं वानता नमामः ॥

कीर्तिर्यदीया धवलामलेयं,
विराजतेऽद्यापि हि सर्वदिक्षु ।
तं राजनीतौ कुशलाग्रगण्यं,
वीरं नमामः शिवराजसिंहम् ॥
यः स्थापयामास सुधर्मराज्यम्,
प्राकम्पयच्चाप्यवरङ्गजीवम् ।
श्रीरामदासादिरतां विधेयं,
वीरं स्तुमस्तं शिवराजसिंहम् ।

देवगोष्ठी



ओं **देवगोष्ठी** ओं

प्राच्यप्रतीच्यचिकित्सयोर्भेदः

— श्रीमद्भगवद्दत्तो वेदालङ्कारः

देहात्मसम्बन्धस्थिति कारणानि
बुद्ध्या विजानीहि विचारितानि ।
स्वाद्वन्नसारात्मक भोजनानि
शरीरशक्त्युद्भव वृद्धितानि ॥ १

प्राणैः क्रियावान् गतिमांश्च लोके
प्राणान्वियोज्यस्थितौ प्रयाति ।
स्रोतो नु तेषां भवतीह देहे
घ्राणैर्निपीतः पवन प्रवाहः ॥ २

सोमात्मकान् विविधरसान्नु सर्वान्
सर्वांश्च सोमांशियाति चर्चितानि वै ।
यदापि येच्छा चिति धारणाय
न चाम्बुपानं कथितं विबुधैः ॥ ३

नायं समर्थः किल भूत संघः
कर्तुं स्वयं मानव जन्मजातम् ।

देवगोष्ठी

कोऽन्य: समुत्पत्तिमिमां विधातुं
शक्त: सुधीभिस्तु विवेचनीय: ॥ ४

आत्मा मनो वा मनुषां तनुश्च:
आवश्यकं तत् प्रवदन्ति तज्ञा: ।
वंशानुपातेन हि प्राच्य संज्ञा
प्राप्तात्मना वै बिबुधां सकाशात् ॥५

देहास्त्वयं नाशमुपैति काले
काले हि जात: स तु भूतसंघात्
उच्यापि ते तेन जनै: प्रतीच्य
प्राच्यप्रतीच्यात्मनि ह्येष भेद: ॥६


प्राच्यप्रतीच्येषु गदेषु भेद:
प्राज्ञै: पुराणै: भणितो भिषग्भि:
रोगापहारेऽपि तथैव भेद:
ज्ञातस्तु तै: गुह्य विचार विद्भि: ॥७

प्राच्ये चिकित्सा नहि भौतिकी सा
पारं प्रयातीह सुसाधिता वै
तत्रास्ति सामर्थ्यमलौकिकानाम्
रोगापहारे खलु साधनानाम् ॥ ८

देवगोष्ठी

प्रतीच्य रोगेषु तु भौतिकी वै
मान्या चिकित्सा भिषजां वरेण्यैः ।
इत्थं विभेदः खलु चिन्तनीयः
सर्वैः सुधीभिः स्तुतयोगपोवैः ॥ ८

पं. भगवद्दत्तः
वेदालङ्कारः



दैवगोष्ठी

पञ्चशील[illegible]

1. अन्येषां देशानां प्रादेशिकाऽखण्डतायाः प्रभुसत्तायाश्च समादरः ।
2. कस्मिंश्चिदप्यन्यस्मिन् देशेऽनाक्रमणम् ।
3. कस्यचिदपि देशस्यान्तरिक विषयेष्वनाक्षेप
4. समानता परस्परलाभश्च
5. शान्तिपूर्वकं सहास्तित्वम् ।

भारतीया वैदेशिकी नीतिः

अस्माकं देशस्य विदेशनीतिः समुचिता नवेति विषयमाश्रित्य बहुधा विवादः प्रवर्तते। "प्रज्ञा तु मन्त्रेऽधिकृता न शौर्यम्" इति नीतिवचोऽनुरूप्यैव अस्माभिः स्वकीया विचारसरणी प्रसारणीया। एतादृशे जटिले प्रश्ने विचार्यमाणे सति नास्माभिः सहसा आवेशवशात् स्वार्थबुद्ध्या वा किमपि विचारणीयम्, जगतः सर्वां पूर्वापरभाविनीं दशां विवेकबुद्ध्या विचार्य अस्माभिः स्वनिर्णयो देयोऽनुष्ठेयश्च।

अयि सभ्याः महानुभावाः! नाविदितं भवतां श्रीमतां यदिदं सुविशालं द्वितीयं महायुद्धं जगतो विनाशाय अमङ्गलायैव केवलं बभूव। परमाणुशस्त्रबलेन न केवलं जापान-देशस्य महती विनष्टिः सम्वर्तित,

देवगोष्ठी

यां इंगलैण्ड-फ्रांस-जर्मनी प्रभृतीनां युरोपीय-
महाशक्तीनामपि प्रबला क्षतिरभूत्। यदि कश्चि-
त्ततो मुक्तः तर्हि रूसामेरीकादेशावेव। तत्रापि
विशेषतः अमरीका देश एव। यस्य गत महा-
युद्धे न काऽपि क्षतिरभूत्। प्रत्युत स किल
कुसीदात् सुप्रचुरामर्थराशिमवाप्य स्वसमृद्धिं
समेधयामास। अतः द्वितीयमहायुद्धावसाने
यद्यपि दयनीयां दशामुपगता अन्ये देशाः
दीनाः क्षीणाश्च सन्तः भगवन्तं सकलजगदधि-
नायकं परमेश्वरं शान्त्यै प्रार्थयन्ते, तथापि
रूसामेरीकादेशौ स्वसाम्राज्य विस्तारेप्सया शीत-
युद्धे प्रवृत्ताववलोक्येते।

अस्मिन् अतीते महासमरे
क्षीणशक्तयः ब्रिटेन-हालैण्ड-फ्रांस प्रभृतयो
देशाः स्वीयान् उपनिवेशान् यथापूर्वमायत्ती-
कर्तुमक्षमाः सन्तः तान् पराधीनतापाशान्मुमुचुः
तेन च स्वकीय स्वातन्त्र्य संग्रामे सफलीभूताः

देवगोष्ठी

भारतवर्ष - वर्मा - इण्डोनेशिया - मिश्र - लंका - मलाया - घाना प्रभृतयः देशाः स्वातन्त्र्यं लेभिरे। तदर्थं महायुद्धप्रसारजर्जरितानां यूरोपीय-देशानां सद्योपलब्धस्वातन्त्र्यजन्मनां अस्मादृशां एशियाई देशानां च निर्माणकालो, न तु व्यापारकालः।

अस्मिन् परमाणुशस्त्रप्रधाने दूरप्रक्षेपकास्त्रप्रतिद्वन्द्वितापरायणे च युगे कोऽपि देश एकाकी सुरक्षितश्च न तिष्ठति एकत्रापि प्रसज्यमाने समरे विश्वमपि विश्वं तत्प्रभावात् दह्यते क्लिश्यते च, इदानीं एकमेव परमाणुशस्त्रं न्यूयार्कोपमं महानगरं एकेनैव क्षणेन भस्मावशिष्टं वा विधातुमलम्, एकेनैव परमाणुशस्त्रप्रहारेण पुरतः जानुभ्यामवनतिं गन्तुं बलात् बाध्येत। एकेनैव रॉकेट प्रयोगेण कश्चिद्देशः कतिपय-सहस्रक्रोशदूरवर्तिनमपि देशं खण्डितं भग्नावशेषं च विधातुं पारयेत्। तन्नूनं सोरस्यो

देवगोष्ठी

विजयोऽस्मिन् युगे । 'नहि सांशयिकं कुर्यात्' इति बृहस्पतेः वचोऽनुसरद्भिः अस्माभिः स्वात्मा युद्धाग्नौ न पातयितव्यः । नास्माभिः रूसपक्षपातिभिः अमरीकापक्षपातिभिर्वा भाव्यम् । साम्राज्यलिप्सा पतित ~~यो~~ योरुभयोर्देशयोः युद्धतर्षातृप्तिसाधनं भूत्वा स्वकीया आर्थिकी - सामाजिकी वा उन्नतिर्विधेया, तदनुकूला च वैदेशिकी नीतिरंगीकरणीया ।

यं 'अयं निर्माणकालो ननु व्यायाम कालः' इति निर्णये जातेऽपि न समस्या समाधीयते । यतो हि स्वराष्ट्रस्य विविधोन्नतिकारकं निर्माणं कस्याश्चित् महाशक्तेराश्रयेणैव संभवति । सा च महाशक्तिरिदानीं रूसदेशो वाऽमरीका वा । अतस्तयोरेकतरस्या आश्रयेण अस्माकमभिमतसिद्धिः संभवति - इत्यस्ति केषांचित् विचारकाणां मतम् । चीनपाकिस्तानौ च

देवगोष्ठी

तत्र दृष्टान्तत्वेन उपन्यस्यते । यन्न तद-स्मभ्यं रोचते । अस्माभिस्तु श्री पण्डित-जवाहरलालनेहरूभिरङ्गीकृता तटस्थनीतिरेव समुचिता मन्यते । यतो हीदानीं परस्पर-विरोधिराष्ट्रयोः महाशक्त्योर्मध्ये अन्या-स्यैकतरस्य आश्रयोऽपरस्या विरोधाय कल्पिष्यते तेन चानयोरेकतरपक्षाश्रयेण यदि कदाचि-त्प्रवर्तेत गोधूमपिष्टमिवास्माकं गतिर्भवि-ष्यति । तेनास्माकं विनाश एव, न तु कोऽपि लाभः । तथा च एकतरपक्षाश्रयात् नीति-मवलम्ब्य वयं युद्धसमुत्तेजनं विधाय लोकविध्वंसापराधिनोऽपि भविष्यामः ।

अस्माभिस्तु स्वसंस्कृत्यनुरूपं – "सर्वे भवन्तु सुखिनः । सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्" इति कल्याणमयीं भावनामन्तर्निवेश्य शान्त्यै प्रयतितव्यम् । यन्नेहरूस्य अभिप्रायो यदी-दानीं प्रत्यक्षमनुभूतोऽपि ~~यथासम्भवं~~

देवगोष्ठी

चीनसंकटो न नेत्रे निमील्य उपेक्षणीयः । तदर्थं अस्माभिः सततैः सावधानैः सीमान्तपरीक्षणासावधानैः ~~[illegible]~~ च भवितव्यमेव । तथापि यथासम्भवं युद्धापनयनायैव प्रयत्नो विधेयः न तु तदुद्दीपनाय । अन्यथा एकत्र समुद्दीपितौ युद्धाग्निकणिका विश्वसमररूपमाश्रित्य समाते वर्षं सकलमपि जगत् भस्मीकुर्यात् ।

तस्मात् सुस्पष्टमेतद् यत् स्वदेशहिताय जगति शान्तिस्थापनाय च अस्माभिरिदानीं तटस्थनीतिरेवाश्रयणीया, तदर्थमेव च सततं प्रयतनीयम् । इत्यलमति विस्तरेण।

विदुषामनुचरः धर्मदेवो वेदवाचस्पतिः

देवगोष्ठी

विजय-दशमी

अस्माकं देशः पर्वणां धनी-विद्यते, नात्यत्र कोऽपि सन्देहः। ऐतिहासिकी काचित् घटना ~~अवश्य~~ अवश्यमेव संजायते पर्वणामन्तरे। तासु काश्चिद् घटनाः प्रकाशिताः, काश्चिच्चाप्रकटिताः भवन्ति। संक्षेपतोऽस्माभिः किल कथयितुं शक्यते, एतानि पर्वाणि मानवानां कृते धूमयानानां संगमस्थानवत् (जंक्शन) जायन्ते यतोहि यथा धूमयानं सहस्रयोजनपर्यन्तं नितान्तं गच्छत् स्वस्थितिस्थाने कतिपय होरार्थमवतिष्ठति। तथैव मनुष्योऽपि सततं बहुविधैः कार्यैर्घूर्णितः परिश्रान्तश्च स्व मनोविनोदं विलासं

च एतादृशेषु पर्वस्वेव विदधाति ।

कथ्यते मनुष्यः एकः सामाजिकः प्राणी वर्तते । स वैयक्तिकभावेन निजाह्लादं न कर्तुमर्हतीति । यान्यपि पर्वाणि मान्यन्ते तान्यखिलान्येव सामूहिकरूपेण मान्यन्ते । एतादृशानि पर्वाणि कस्यापि राष्ट्रस्य, देशस्य जातेर्धर्मस्य वा राजनैतिकं-सामाजिकं-धार्मिकं-चैतिह्यं रक्षन्ति ।

विजयदशमी, पर्वविशेषो वर्तते, दशम्यां शुक्लपक्षस्य च मान्यते । पर्व एतन्निज देशजात्यनुसारेण भारतवर्षस्य विभिन्न प्रान्तेषु पृथक् 2 नाम्नाभिधीयते । बंगप्रान्ते ~~दुर्गापूज्य~~ दुर्गापूजेत्यभिधानेन प्रसिद्धं दुर्गापूजा एव तेषामुत्कृष्टं पर्व वर्तते ऽखिलेषु पर्वसु । तत्रास्मिन्पर्वणि समस्ता जना दुर्गां स्तुवन्ति । यदि तत्र विजयदशम्या अवसरे दुर्गामर्चयन्ति, तर्हि सरस्वत्यां ब्राह्मणाः, लक्ष्म्यां वैश्याः, शस्त्रास्त्रेषु क्षत्रियाः, उच्च-

देवगोष्ठी

वर्णानामर्घ्य सामग्रीषु च वैश्या निमग्ना भवन्ति। आसीदियं प्रथा आदिक्षत्रियाणां पदवस्त्रैरात्मानं विभूष्य, विभिन्नशस्त्रैरलङ्कृत्य, अश्वेषु च आरुह्य, भ्रमणस्य। यत्र तत्राधुनाप्यवलोक्यते इयं प्रथा।

विजयदशमी, दशहरेति नाम्ना कथं प्रसिद्धा? अस्मिन्विषये एका रोमाञ्चकारिणी ऐतिह्यरूपा कथा प्रचलिता। यस्मिन्काले ऽस्माकं देशे रामराज्यमजायत आसीच्च भारतवर्षं धनधान्येन परिपूर्णं, तस्मिन्समये कैकेयी नाम्न्या मात्रा, रामं वनवासाय प्रेष्य रामराज्ये वज्रपातो विहितः। रामेण सह सीतालक्ष्मणौ च गतौ। अरण्यवास समये एकदा रामलक्ष्मणयोः अनुपस्थितौ, रावणेन साधुवेशं विरच्य कपटेन सीता अपहृता। अनया घटनया रामे दुःखपातो ऽभवत्तथापि तेन अगाधधैर्योत्साहपराक्रम बाहुल्यात् सीतामधिगन्तुं पुनः यत्नः कृतः। मर्यादापुरुषोत्तमेन रामेण —

देवगोष्ठी

सुग्रीवहनुमत्सदृशीं चमूमेकत्र कृत्वा, दुर्दमनीयः, दुर्जेयः लंकाधिपतिश्च रावणः आक्रमितः, पराभूतश्च कृतः। तदा प्रभृत्येव इयं विजयदशमी, दशहरेत्यभिधानेन प्रसिद्धा जाता।

पर्वण्यस्मिन् जनाः वस्त्रालङ्कारैरात्मानमलङ्कुर्वन्ति, गृहाणि च निर्मलानि विधीयन्ते। ते च विचिन्तयन्ति यत् नु अद्यैव रामचन्द्रेण तेषां गृहाणि विभूष्यन्ते। मातरस्तु एतादृशे प्रसन्नवदना जायन्ते यथा तेषां पुत्रेणैव लंका विजिता, भगिन्यश्चापि निजाह्लादमवरोद्धुमेवमसमर्थाः जायन्ते यथा तेषां भ्राता एव विजयदुन्दुभिरयमाकाशे गुञ्जापितः।

विजयदशम्याः पञ्चदशाव दिनेभ्यः पूर्वमेव स्थाने स्थाने रामलीला विधीयते। अभिनयस्यावसाने रावणस्य,

देवगोष्ठी

पत्रतृणादिनिर्मिता वृहत्काया प्रतिकृतिः अग्निसात् क्रियते । तस्या मध्ये च यत्र तत्र अग्निबाणा निधीयन्ते । ये वन्हौ प्रदीप्ते सति सतडतडा शब्दैः गगनं गुञ्जितं चित्रवर्णप्रकाशेन चालङ्कृतं कुर्वन्ति ।

विजयदशम्या विषयेऽन्याः अपि बह्व्यः किम्वदन्त्यः प्रसिद्धाः सन्ति । कैश्चिदुच्यतेऽस्मिन्नवसरे राजादर्शनं शोभनं भवति, अपरैश्च कैश्चिदभिधीयते यत् नीलकण्ठस्यावलोकनं शोभनं जायते, यतो हि सास्मिन्दिने आत्मानं गोपायति, इतरैः कैश्चिच्च कथ्यते खञ्जनपक्षिणः दर्शनं शुभं जायते, यतो हि योऽपि पश्यति स कविः सञ्जायते । अन्या अपि बहुलाः किम्वदन्त्यः सन्ति ।

वस्तुतोऽस्मिन्पर्वणि जनैः चिन्तितव्यं, यदस्मिन्नवसरे केवलं रामेण

देवगोष्ठी

रावणः न पराजितः, परं धर्मेणाधर्मो जितः। अस्मिन्दिने रामस्य विजयो न, अपितु न्यायेनान्यायः परास्तः कृतः आसीत्।

अद्यश्वो नवयुवकैः युवतिभिश्च इयं प्रतिज्ञा करणीया, यद् वयमपि रामलक्ष्मण सदृशाः, सीतातुल्याश्च भविष्यामः। तदैवास्माकं देशः स्वर्णयुगस्य सोपाने आरोढुं समर्थो भविष्यति, तदैव चान्यदेशवासिभिः पुनः कथयिष्यते "जयतु जयतु भारतदेश" इति ॥

ब्रजेश कुमार

देवगोष्ठी

भारते प्रचलिता संस्कृत-शिक्षाप्रणाली संस्कृतेः-उन्नतौ साधिका

जगति विद्यमानासु भाषासु अमरवाण्याः संस्कृतभाषायाः विशेषस्थानं विद्यते। प्राचीन धार्मिकसाहित्यमस्यां संरक्षितं वर्तते। अतः धार्मिकदृष्ट्यास्याः अत्यधिकं महत्त्वमस्ति। यादृशानि सुन्दराणि काव्यानि नाटकानि पुस्तकानि च संस्कृतभाषायां वर्तन्ते न तादृशानि अन्यासु भाषासु। कलात्मकदृष्ट्यापि विशेषस्थानमस्या अस्ति।

राजनैतिकदृष्ट्या इयं भाषा महत्त्वपूर्णा। वर्तमानकाले हिन्दीभाषायाः विकासस्तु भवत्येवास्याः एव कारणात्। अतः सकलदृष्ट्यास्याः भाषायाः गौरवास्पदं स्थानं

वरीवर्ति । एतदेव कारणमस्ति यत् सततमेव संस्कृतस्य प्रचारः सर्वत्र वर्धत एव साम्प्रतम्। प्रायशः प्रत्येकं विद्यालये देववाणी पाठ्यते। प्रतिवत्सरं छात्रा आचार्यशास्त्री विद्यावा-चस्पतिलङ्कारादीन् उपाधीन् प्राप्नुवन्ति।

उत्तरप्रदेशे तु एक संस्कृत विश्व विद्या-लयोऽपि विद्यते वाराणस्याम्। पञ्चनद प्रान्ते कुरु-क्षेत्र नगरेऽपि विश्वविद्यालयः प्रतिष्ठापितः यो हि शनैः २ विकसति। संस्कृत प्रसारस्य कारणं वर्तते यद् भारते प्रचलिता वर्तमान-संस्कृत शिक्षा प्रणाली। बहवो कथयन्ति यत् इयं प्रचलिता प्रणाली संस्कृतोन्नतौ बाधिका वर्तते। कैश्चिदुच्यते यत् वर्तमान-समये अस्यां प्रणाल्यां व्याकरणाध्ययनेम-हान् कालो याति। अतः व्याकरणाध्ययनं संस्कृतोन्नतौ बाधकं वर्तते। परमेतत् कथनं कथमपि उपयुक्तं न प्रतिभाति।

देवगोष्ठी

व्याकरणमेव तु संस्कृतभवनस्याधारशिला वर्तते । तस्मिन्नाधारे दुर्बले सति निश्चित-मेवास्ति पतनं संस्कृत भवनस्य । अनेक-स्थलानि एतादृशान्यपि सन्ति यत्तेषां सम्यक् बोधः व्याकरणं बिना न कथमपि संभवति । यथा कुत्र "नुमागमो" कुत्र "अडागमो" कुत्र षड् कुत्र च रुत्वे : स्थाने तिच् भवति कुत्र च स्यः भविष्यतीति अस्य बोधो न भविष्यति ।

गृह्धातोः क्त प्रत्यये सति गृही-तुमिति रूपं भवति, तुमुन् प्रत्यये सति गृहीतुमिति रूपं भवतीति कथं ज्ञायते व्याकरणं बिना । अतः व्याकरणस्याधिक्यं संस्कृतोन्नतौ बाधकमिति वर्तते इति न । व्याकरणेन तु संस्कृत भाषा सरला भवति । अतः व्याकरणमेव साधकमस्ति ॥

देवगोष्ठी

योऽयं दोषो दृश्यते यत् ~~विपश्चिन्निर्मित~~ जटिलं वर्तते व्याकरणं, तस्य च पठनेन काठिन्यमुत्पद्यते, विद्यार्थिनां कृते च नीरसता भवति इत्यस्य समाधानं तु वर्तते एव।

येन कोऽप्याधिकं व्याकरणं पिपठिषति स राजकीयविद्यालयेषु पठेत् न पुनः पाठशालासु यत्र हि व्याकरणस्य गहनमध्ययनं भवति। अन्यथा: प्रणाल्यास्तु इयमेव विशेषताऽस्ति यत् प्रत्येकः व्याकरणज्ञोऽस्ति।

अथ पुनः ये केवलं संस्कृतसाहित्यस्याध्ययनं कुर्वन्ति तेषां ज्ञानं परिमितं जायते। ते हि व्यावहारिकं ज्ञानमपि न जानन्ति। वर्तमानकाले प्रचलितासु संस्कृतपाठशालासु अन्ये विषयाः न पाठ्यन्ते, अत इयं प्रणाली दूषिता ~~[illegible]~~

अनया प्रणाल्या मानसिकविकासो न भवति। अतः ये केवलं संस्कृतं पठन्ति

ते मूढधियो भवन्ति । यदि संस्कृतेन सह अन्ये-
ऽपि विषयाः पाठ्येरन् तर्हि तथा नो भवेत् ।
इति यदि कश्चिदुक्तवान् तर्हि उत्तरमस्ति यत् निराधा-
रोऽयं दोषः । येषामेतत् कथनमस्ति मन्ये
तैः वाराणसेय संस्कृत विश्वविद्यालयस्य
पाठ्यक्रमो न दृष्टः । तत्र खलु अन्येऽपि
बहवो विषयाः पाठ्यन्ते । इत्थं संस्कृतछात्रे-
षु सामान्यज्ञानाभावं प्रकाशयन्तो आत्म-
नैव सामान्यज्ञानशून्यतां प्रदर्शयन्ति । यतो हि
वाराणसेय संस्कृत विश्वविद्यालयस्य
पाठ्यक्रमं विलोक्य सामान्यज्ञानस्य
पाण्डित्यं प्रकाशतामायाति ।

यच्चोच्यते यत् कोऽपि छात्रः
संस्कृतभाषां न पिपठिषति यतो हि
प्रणाली दूषिता वर्तते । अत एव येयं
संस्कृतोन्नतौ बाधिकाऽस्ति इति । अत्र विचार्ये

देवगोष्ठी

इदमेव ब्रूमः यत्रोष संस्कृत शिक्षा प्रणाल्या
न दोष, परं शासकानामेव। ये किल
संस्कृत भाषायाः आंग्लभाषायाश्च विद्वांसः
भेदं जनयन्ति। सर्वकारः यथा आंग्लभाषा-
विदां सम्मानं करोति तथा संस्कृतज्ञानां
न। चेत् उभयोः समानः आदरः स्यात्तदा
तद्दृष्ट्वा छात्रा अपि पठिष्यन्ति इमां भाषाम्।
साम्प्रतं एम.ए उपाधिधारिणे यादृशं
वेतनं दीयते, तादृशमपि आचार्यो-
पाधिभूषितेभ्यः संस्कृतपंडितेभ्यः न।
तर्हि कथं छात्राः संस्कृतं पठितुमुत्सहेरन्।


यदायं भेदो न भविष्यति सर्वकारः
संस्कृतज्ञानामपि सम्मानं करिष्यति तेभ्यः
समानाधिकारान् प्रदास्यति तदावश्यमेव
संस्कृतस्य प्रचारः उन्नतिश्चाधिकाधिकं भविष्य-
ति। ये पुनः अर्वाचीनवादिनः सर्वमेव
प्राचीनमिति मनसा मन्यमानाः सर्वत्र दोषमेव

देवगोष्ठी

गोष्ठ्या... ते किल सोऽहं सानुनयमभ्य-
र्थन्ते गुणदोषविवेकपुरस्सरं समीक्षितुम् ।

अयि सभ्याः पाठकाः ! यदि भवन्तः
संस्कृतसाहित्यस्यागाधगाम्भीर्यमभिगन्तु-
मामनन्ते, यदि धीमन्तः शब्दार्थानामथनिर्ना-
मर्मणिमव बोद्धुमभिलषन्तो, तर्हि पंडितप्रवरैः
प्राचीनात् कालात् प्रवर्तितामिमां प्रणाली-
मेवानुसरन्तु । अत्र पुष्पादिसेचनं विटप-
मूलमेव सिञ्चन्तु, अन्यथा हानिरेव
न कोऽपि लाभविशेष इत्येतं विजानन्तु ॥

श्यामनाथ



देवगोष्ठी



आचार्यः रामदेवः

विजयकुमारो नावमिकः

यस्य स्मृतिः साधु चमत्कृतासीद्,
धर्मे च निष्ठा सततं विकम्पा।
सद्योगमता विद्वज्जन प्रशस्ता
श्री राम देवं तमहं नमामि ॥

"स्वार्थो यस्य परार्थ एव स पुमान् एकः सतामग्रणीः"

इदानीं सामाजिकत्वे यदि किमप्युदाहरणं समुपस्थाप्येत् तर्हि आचार्यरामदेवादधिकं किमप्युदाहरणं न शोभनम्। उत्थाने, शयने, पाने, भाषणे प्रत्येकक्षणमेव तेषां मस्तिष्के वैदिकधर्मोद्धारः, आर्यसंस्कृतेः महत्त्वं, प्राचीनसभ्यतायाः पुनरुद्धारः कथं भवेत्

देवगोष्ठी

एषु विषयेषु ते संलग्ना अभवन् । आद्यन्तं पर्यन्तं जीवनस्य केवलमिदमेवोद्देश्यमासीत् ।

तेषां जन्म, पालन पोषणं देहान्तश्च सर्वं आर्यसामाजिकस्य वातावरणे अभवत् । तेषां पिता ला. चन्दूलाल महोदयस्तु आर्य-सामाजिक एवासीत् । पिता पितृव्यश्च तौ बालकौ पाठयित्वा स्वकीयसामाजिककार्यान्नि-ताम् । पिता पाञ्चालस्थ डाकतार सिव-परिवार गद्दधिकारक आसीत् । तस्य प्रभावेन तत्र तेषां मित्राणां संसर्गजातेन सिवपरिवारेऽपि बहवः धार्मिकविषये-षु च अभवन्, यौ बालक रामरत्नः (आचार्य रामदेवस्य बाल्यकाले इदमेवासीन्नाम) एकाग्रचित्तो भूत्वा अशृणोत् । कदाचित्तु सोऽधिकायां रात्रौ कतीसा यामपि नास्वपत् ।

देवगोष्ठी

बालकरामदासस्य जन्म खीष्टाब्दे बलवाडा ग्रामे जिलाहोशियारपुरेऽभवत् । तेषां पितृचरणा मउशीठिया परिवारस्य पिन्दासा आसन् । अतस्ते निजकार्येभ्योऽनवगाढ-मानस् । अत एव रामदासस्य सम्बन्धस्य जन्मभूम्या सह किञ्चित् नासीत् ।

आधुनिककालात् षष्ठिवर्षपूर्वं पंचनदप्रान्तस्य जालन्धर नगरे पञ्चदश-षोडशवर्षदेशीयः एको नवयुवकः गीतं-गायमानः अस्माई गन्ते मार्गे तीरे एक वृक्षस्याधः स्वकुलमानि निद्रया समतिष्ठत् । तस्य मुखमण्डलं चिन्ताग्लानिमोदासीन्येन पूरितमासीत् किन्तु ततोऽपि तस्य मुखमण्डलं प्रबलप्रतिभा न प्राकाशत । अस्मिन् समये एव एकः

देवगोष्ठी

पथिकस्तेनैव मार्गेणागच्छत् । स तं युवकं तत्र एकाकी स्थितेः कारणमपृच्छत् । युवकेनोक्तम् — "मम पित्राहं गृहात् निष्कासितः महाविद्यालयस्याचार्येण च कक्षायाः निष्कासितः । "अहं कुत्र गच्छेयम्" इत्येवाहं चिन्तयामि । मह्यन्तु इदं सुपरिचितं जालन्धरनगरमपि अरण्यमिव प्रतिभाति, अत एवाहमत्र वृक्षस्याधः तिष्ठामि । पथिको गृहमहाविद्यालयाभ्यां च बहिष्कृतेः कारणं पप्रच्छ । स युवकोऽब्रवीत् । "अहं स्वगृहवस्तूनां प्रच्छन्नं विक्रीणामि, अहं स्वमातायाः स्वस्वसुश्च वस्तूनां चलनाय विरोधमकरवं, यस्यायं दुष्परिणामः — मम गृहात् महाविद्यालयाच्च निष्कासनम्" — पथिकमुखाद-कस्मादेव निःसृतमिदं वचनम्, "अति-

देवगोष्ठी

निर्भीकः, साहसी, उचितवादी जातः। वेदभाष्य
इममगाधसागरमन्तरे निधाय, क्रान्तेः
अग्रदूत। कोऽसि। त्वं युवक। युवक
उवाच - अहमत्र महाविद्यालये तृतीयवर्षे
पठामि, मम नाम रामदेवः अस्ति॥

स्वकीयं सकलजीवनं राष्ट्रस-
सिद्धान्तस्य प्रचारार्थं समर्पितवान्:
आचार्य रामदेव महोदया आसन्।
त्यागस्य तपस्या एवं श्रद्धया वैदिक
संस्कृतेः व्याख्याताः वैदिक जीवनं
प्रति आस्था विश्वासः, इत्येव तेषां
जीवनस्य विशेषतासीत्। ते:
गुरुकुल कांगड़ी विश्वविद्यालयस्य
परिचयं विना पदेषु [illegible] अकुर्वन्।
गुरुकुलस्य मुख्याधिकारिणा तत्र [illegible]
परीक्षायाः प्रतिज्ञां कृत्वा मुख्याधिष्ठा-

देवगोष्ठी

स्य पदमदुः। तदनन्तरमपि भवद्भिः
गुरुकुल सेवा न परित्यक्ता, आचार्यत्वञ्च
पदं गृहीतवन्तः। भवन्तस्तेनैव गुणाद्
विलोम्य भवन्तः उपकुलपति पदे नियो-
जिताः। भारतवर्षस्य प्रायशस्सकल-
विशालनगरेषु भवन्तः निमन्त्रिताः प्रति-
वर्षं गतवन्तः, अनेक महत्त्वपूर्णानि
व्याख्यानोपदेश प्रवचन योग्यता
विद्वत्ता प्रभाववशात्, सफलतां हृत्वा
गुरुकुलमातृचरणे समर्पितवन्तः।

गङ्गायाः जलप्लावनेन गुरुकुल-
व्यापारं गतौ तस्यामपि पुनस्तद्
हरिद्वारे पूर्ववत् गुरुकुलभवनेषु स्थापयि-
त्वा तैः गौरवमनुभूतम्। इदं
भवादृशानां पदे लाहौरस्य विदुषः

देवगोष्ठी

पौरुषस्यैव सार्थमासीत् ॥

भवन्तः न केवलं मल्लानां तेषाम्
आर्थिकस्थितिमेव दृढामकुर्वन् किन्तु
स्वकीयाद्वितीयकविता योग्यताभ्यां रचनात्मकलेखो-
पदेशाभ्यां चाध्यात्मसंस्थाया गौरवेऽभिवृद्धि-
मप्यकुर्वन् ।

हरिवर्षपातालादि विदेशेभ्य आगच्छतां
विदुषां हृदयेषु गुरुकुलस्य सरलजीवनस्य
वैदिकसभ्यतायाः संस्कृतेश्चानिवार्य प्रभाव
आपतत् । अस्यापेक्षिकतरं श्रेयस्तु भवत्स्व
एव देयमासीत् । भवन्तस्त्ववकाशेन नूतन-
नूतन विचारान् विद्यार्थिभ्य अददुः ।

"वैदिक मैगजीन" नामिकायां आंग्ल भाषायाः
पत्रिकायां प्रकाशितान् लेखान् पठित्वैव तत्-
देशीयास्तथा विदेशीया विद्वांसोऽपि
विस्मिता अभवन् । श्रुति प्रमाणे स्व

देवगोष्ठी

अपि वैदिकसिद्धान्तानां समर्थनमेषूपलभ्यते स्म । तै: "भारतवर्ष का इतिहास" "पुराण मतपर्यालोचन" इत्याद्यनेके ग्रन्था: लिखिता: । तेषु ग्रंथेषु भारतवर्षस्य संस्कृति:, सभ्यता, आदर्श:, शिक्षा-दीक्षा राजनीति:, वसनम्, आचार-विचारेषु विमर्श: भारतीयदृष्टिकोणेनैव भवति । इदमेव कारणं यत् तैर्लिखितानां ग्रंथानां विद्वत्सु दार्शनिकेषु, विचारकेषु च समादरोऽभूत् ।

भारतवर्षस्य कोऽपि समाज: नाभवत् यत्र तेषां नवीनेन विद्वत्कौशलेन च भाषणेन जना लाभान्विता नाभवन् । समाजानां साप्ताहिकसत्संगानां प्रमुखार्य-सम्मेलनानां चार्यसमाजानां वार्षिक-

देवगोष्ठी

महोत्सवानां प्रसंगेषु ते च व्याख्यानैः मनुष्येषु जागृतिं समुत्पादयन्तः, महर्षिदयानन्दस्य च ~~अ...~~ अनन्यान् भक्तानसृजन्।

ते कन्यानां शिक्षणायापि अति समर्थका आसन्। अत एव कन्या गुरुकुलस्य परियोजनामपि सम्पूर्णशक्त्यान्वकुर्वन्। तेषां ~~मे~~ विश्वास आसीद्यत् गुरुकुलेन दीक्षिता ये स्नातकाः स्नातिकाश्च बहिर्निर्यान्ति ते देशस्य समाजस्य च सेवां करिष्यन्ति।

इत्थमाचार्यरामदेवमहोदया महर्षिदयानन्दस्य परं भक्ताः, वैदिकजीवनस्य, संस्कृतेश्च परं समर्थका आसन्। ते स्वसम्पूर्णं जीवनं गुरुकुलहितायैव युयुजिरे। एतादृशस्य परमत्यागिनो महापुरुषस्य जीवनेन राष्ट्रेणावश्यमेव शिक्षा ग्राह्या॥

देवगोष्ठी



देवगोष्ठी

प्रहेलिकाः

अपदो दूरगामी च साक्षरो न च पंडितः।
अमुखः स्फुटवक्ता च यो जानाति स पंडितः॥

गोपालो नैव गोपालस्त्रिशूली नैव शंकरः।
चक्रपाणिः स नो विष्णुर्यो जानाति स पंडितः॥

अस्ति ग्रीवा शिरो नास्ति द्वौ भुजौ करवर्जितौ।
सीताहरण सामर्थ्यो न रामो न च रावणः॥

दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः।
गुणस्यूति समृद्धोऽपि परपादेन गच्छति॥

पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः।
चलते वायुवेगेन पदमेकं न गच्छति॥

सुभाषितरत्न भाण्डागारात्॥

देवगोष्ठी

ध्येयम् —

लोके तपोधनपुनर्जननं यथा स्यात्,
तेजोविहीन जनता विलयो यथा स्यात् ।
सद्ब्रह्मचर्यचरणप्रसरो यथा स्यात्,
एतत्तथा गुरुकुलं विबुधा निबद्धम् ॥



देवगोष्ठी



देवो दयानन्दः

महर्षि दयानन्दः गुर्जर प्रान्तीय टंकारान्तर्गत मोरवी नाम्नि ग्रामे कर्षणजीवस्य भवने जन्म लेभे। अस्य जन्मकालीनं नाम मूलशंकर इति आसीत्। मूलशंकर शैशवादेव तीक्ष्ण बुद्धि कोमल स्वभावश्च आसीत्। एनं अध्यापयितुं कर्षणजीवः स्वगृहे एव संस्कृत शास्त्र-विद्वान् पण्डितान् रक्षित्वा अध्यापन प्रबन्धमकरोत्। अयं महर्षिः स्वगृहे एव लघु कौमुदी सिद्धान्त कौमु-द्यमर कोषादि ग्रन्थान् अपठत्।

एकदा शिवरात्रि प्रकरणे अस्य पिता शिवस्य व्रतमाचरितुम् अकथयत्। अनेन पृष्टं पिता शिव

देवगोष्ठी

व्रतस्य अनेकं महिमानमविदित्वापि बाल्यपने विश्वस्य अयं शिव व्रतमकरोत् न[illegible] विशेषं फलमाकर्ण्य राज्ञावपि बहुरसं शिवस्य व्रतं कर्तुं प्रयत्नमकरोत्। रात्रौ व्रतं कुर्वाणः अयं शिव मन्दिरे शिव लिंगस्य समीपे उपविशन् द्वादशवादन समये सर्वान् पूजकान् पितरञ्च शयानानवलोक्य शिव लिंगोपरि शिवप्रसादं भुञ्जानं मूषकं च वीक्ष्य पाषाण-शिव व्रतात् विरक्तः। तस्मिन्नेव समये पितरम-जागरयत् पितरञ्च अवदत् पितः! एतादृशस्य शिवस्य व्रत विधाने न किमपि फलं भवितुमर्हतीति। यतः यः शिवः स्वस्य आत्मनः उपरि क्रीडन्तमाखु-मपि निवारयितुं न समर्थः सः अस्मान् विपत्तौ रक्षेत् इत्यत्र का आशा। अतः अहमधुनैव गृहं

देवगोष्ठी

गत्वा खादिष्यामि । पित्रा समाहूतोऽपि अयं उठात गृहं गत्वा मातरं प्रबोध्य भोजनमकरोत् ।

तत्प्रभृति अस्य मनसि चिन्ता समुदिता केन प्रकारेण सत्यस्य शिवस्य साक्षात्कारो भवेत् । एकदा भगिन्याः पितृव्यस्य च असामयिकं मरणं विलोक्य एतस्य हृदये संसारात् अत्यधिका विरक्तिर्जाता, कस्मिन्नपि कर्मणि मनः न संलग्नमभूत् । अहोरात्रं सत्यस्य शिवस्य दर्शनस्य कृते विचिन्तयतोऽस्य दिनानि व्यतीतानि अभूवन् ।

एकदा कमपि अकथयित्वा गृहात् निर्गतः । गृहात् निर्गत्य साधूनां समाजे परिभ्रमणमकरोत् । परिभ्रमण समये अस्य हृदय संशयस्य निवारणे समर्थान् गुरून् कुत्रापि अनवलोक्य अयं तपश्चरितुं हिमालय प्रदेशं प्रातिष्ठत । तपस्यानन्तरं पुनः एकं विशिष्टं गुरुमन्वेषमाणः प्रज्ञा चक्षुषः विरजानन्दस्य नाम निशम्य मथुरा

देवगोष्ठी

नगरीं समागतः । मथुरा नगर्यामागमनात् पूर्वमेव पूर्णा-
नन्द स्वामिना स्वनाम दयानन्दः इति अधारयत् ।
विरजानन्दस्य समीपे वेदादि सच्छास्त्रमधीत्य अयं
संस्कृत विषये महापण्डितो जातः । अस्य गुरुः प्रकाण्ड
पण्डितं मत्वा भारतवर्षे विस्तीर्णां विभिन्न मत प्रच-
लितां मूर्तिपूजां प्राचीन परम्परया समागतं श्राद्धादिक-
ञ्च खण्डयितुमेनम् अवदत् । गुरुणा प्रेरितोऽयं का-
श्यादि प्रसिद्ध स्थानानि गत्वा महद्भिः विद्वद्भिः सह
शास्त्रार्थं कृत्वा मूर्तिपूजायाः श्राद्धस्य मतमतान्तर-
स्य च खण्डनमकरोत् ।

आर्य मतं प्रचारयितुं सर्वप्रथमं मुम्बा नाम
नगरे युगादि दिने पंच सप्तत्युत्तराष्टादशशत-
तमे संवत्सरे आर्यसमाजस्य स्थापनां कृतवान् ।
गुरुकुलमुद्घाटयितुम् अनेकान् जनान् प्रेरयत् ।

देवगोष्ठी

अनेन महर्षिणा प्रेरित एव स्वामि श्रद्धानन्दो महोदयः सर्व प्रथमं कांगड़ीनाम ग्रामे गंगायास्तटे गुरुकुलमस्थापयत्। तस्य पुत्रः श्री इन्द्र विद्यावाचस्पतिरपि तेनैव महात्मना स्थापितं गुरुकुलमत्यन्तं प्रगतिं प्रापितवान्।

अनेन महर्षिणा स्त्री शिक्षा विषयेऽपि बहुप्रयत्नश्चक्रे। बाल विवाह वृद्ध विवाहयोः खण्डनमपि कृतम्। अस्यैव महर्षेः सदुपदेशं समाकर्ण्य लेखराम, गुरुदत्त, हंसराज प्रभृतयः महापुरुषाः स्वजीवनं भारतीय जनतायाः उपकाराय समर्पयन्। अयं महर्षिः अनेकान् महाराजान् कुमार्ग प्रचलितान् स्वीय संभाषणेन सन्मार्गाभिमुखान् व्यदधात्। अयं महर्षिः भारते तत्समये प्रचलिताः सर्वाः कुरीतीः अखण्डयत्। सदाऽयं साधारणवेषः स्वीय वाक्शक्तिभिः सर्वानपि जनान् स्वाधीनानकरोत्। अयमेव महर्षिः सर्वतः प्राक् भारते हिन्दी भाषायाः प्रचारं कर्तुं प्रायतत।

देवगोष्ठी

अयं महर्षिः परिभ्रमन् प्रचरन् समयमवाप्य सत्यार्थप्रकाशम्
ऋग्वेदादिभाष्यभूमिकाम् आर्याभिविनयम् अन्यांश्च ग्रन्थान् व्यर-
चयत्। अस्माकं भारतीयानां दौर्भाग्यात् अनेकवारेषु विपत्तयः जग-
न्नाथनामा पाचकः दुष्टजनेन प्रेरितः एकदा महर्षिणं काचचूर्णं दुग्धे सम्मे-
ल्य पाययितवान्। तद्दुग्धपानात् कतिपयकाले गच्छति अजमेर नाम
नगरे महर्षिर्विनश्वरं शरीरं दीपावल्याः दिवसे अत्यजत्। मृत्युसमयेऽपि
महर्षिः प्रभो! तव इच्छा पूर्णा भवतु इति वदन् मृत्युकालेऽपि जनान् वि-
चित्रां लीलां प्रदर्शयन् प्रसन्नमुद्रायाम् अमुं शरीरं विहाय शरीरान्तरं प्राविशत्।

सत्यार्थप्रकाशः स्वामिनः नाम अद्य लोके यावच्चन्द्रदिवाकरौ स्था-
पयितुं पर्याप्तः अस्ति। [illegible] एतस्य ग्रन्थस्य तुलनायां ग्रन्थाः तुल्याः न सन्ति।

अस्मिन् कलियुगे महर्षिदयानन्देन तुल्यः अस्मिन् जगति
कोऽपि सज्जनः न अभवत्। अयं लोकानां प्रणम्यः स्तुत्यः सेवनीयश्च
आसीत्। अस्माकम् अधुना कर्तव्यं वर्तते यत् महर्षेः अवशिष्टं कार्यं
परिपूरयितुं प्रयतनीयम्। तदैव अस्माकं जन्म सफलं भवेत् च आर्यसमाज
सदस्यानां मध्ये गणनीयाश्च स्याम ॥

परीक्षा

नुनु परीक्षा का वर्तते ? यदास्माकं
सम्मुखे कश्चित् प्रश्नः समागच्छति, कामं स देशस्य,
मातृभूमेः, जातेः, व्यक्तेः समाजस्य वा भवेत्,
वास्तविकरूपेण स एव प्रश्नोऽस्माकं परीक्षा भवति।
तस्मिन् प्रश्ने साफल्यमसाफल्यं वाऽस्माकं [illegible]
भवति। अथवा परीक्षैषा [illegible] मापकयन्त्रमस्ति,
येन वयं [illegible] शारीरिकमानसिकाध्यात्मिक-
बौद्धिक [illegible] अनुमानं कुर्मः। वास्तविकरूपेण
सम्पूर्णजीवनमेव परीक्षास्ति [illegible]। पदे
पदेऽस्माकं जीवने परीक्षा भवति, येनास्माकं
योग्यताऽनुमीयते। यदि वयं [illegible] विचार-
येम तर्हि वयं जानीमो यदस्माकं सम्पूर्णजी-
वनमेव परीक्षा भवति, न केवलं [illegible] वयं परी-
क्षाभवने प्रश्नपत्राणि कुर्मः, स एव समयः।
यतः संघर्षमयं हि जीवनम्। संसारेऽस्मिन्
पदे पदे क्षणे क्षणे चास्माकं जीवने संघर्ष

देवगोष्ठी

आगच्छन्ति, तथैव परीक्षापि। सूक्ष्मदृष्ट्या यदि सम्यग् विचारयेम तर्हि वयं जानीमो यदस्माकं जीवने ये संघर्षा आगच्छन्ति वास्तविकरूपे ते संघर्षा एव परीक्षाः सन्ति।

अस्माकं जीवने परीक्षाया अत्यधिकं महत्त्वं वर्तते। पुरातनकाले विद्यार्थिन आचार्य-महोदयस्याश्रमे विद्यामध्येतुमगमन्। आचार्यमहाभागेन तदा ते आगता विद्यार्थिनः पूर्वं परीक्ष्यन्ते स्म, यदागतानां विद्यार्थिनां पठने, ब्रह्मचर्यपालने, सन्ध्यावन्दनादिकार्ये, आचरणे चाभिलाषो वर्तते न वा। यद्यस्ति, तदा स पाठं पाठयति स्म। पूर्वमेतादृशी परीक्षापद्धतिर्नासीत्, यादृशी साम्प्रतम्। तदा योग्यताधारेण परीक्षाऽभवत्। पुरा यो ब्रह्मचारी नियमपूर्वकं विद्याध्ययनं, यथायोग्य-ब्रह्मचर्यादिनियमानां पालनमकरोत्, स एव परीक्षायामुत्तीर्णोऽमन्यत। अर्थात् यदा स शान्त-चित्तः, जितेन्द्रियः, आचरणप्रियः, विद्वान्, सम-भवत् तदा स परीक्षायामुत्तीर्णोऽवबुध्यते स्म। एषा परीक्षापद्धतिरासीत्।

देवगोष्ठी

८ परं वर्तमानकाले परीक्षापद्धतेः कस्याश्चिद् योग्यतायाः परिमाणं कर्तुं वयं न समर्थाः। अतो ये विद्यार्थिनो निश्चितसमयस्य मध्ये परीक्षाभवने उपविश्य प्रश्नपत्राणि सम्यगुत्तरन्ति, कथं ते अनुचितोपायानामवलम्बनमाश्रित्योत्तीर्णा भवेयुः? त एव विद्यार्थिनः परीक्षायामुत्तीर्णा अपि भवन्ति। य उत्तीर्णा भवन्ति, तेषां योग्यतां न वीक्ष्य तेभ्यो योग्यतायाः प्रमाणपत्रं दीयते। एषाऽनुचिता परीक्षापद्धतिः।

परं परीक्षाया अनेके लाभा अपि सन्ति। प्रथमस्तावत् - यदा परीक्षासमयः समीपे आगच्छति तदा परीक्षाया भयेन शीघ्रं विद्यार्थिनः उत्तीर्णा भवितुं निजपाठं सम्यक् पठन्ति, तस्य स्मरणं कुर्वन्ति च। पठनेनाऽध्ययनेन चास्माकं मानसिक्याः योग्यताया विकासो भवति। पुनः पुनः पठनेन ज्ञानविज्ञानस्य च वृद्धिर्भवति। यदा च मनुष्यो ज्ञानविज्ञाने दक्षो विद्वान् च भवति तदा तस्य समाजे प्रतिष्ठा

सम्पद्येत। तस्य च ज्ञानगौरवं सर्वे जना गायन्ति।
स च यामिनी क्षेत्रे सुखेन निवसति।

परं लाभातिरिक्तं परीक्षापद्धतेरनेका
हानयोऽपि सन्ति। सर्वप्रथमं परीक्षाशब्दः
स्वयमेव एतावद् भयंकरशब्दो विद्यते यदस्य
श्रवणमात्रेणैवानेके जना (विद्वांसोऽपि च)
व्याकुला भवन्ति। द्वितीयस्तावत् परीक्षाया
अयं दोषो वर्तते यदाधुनिक परीक्षाप्रणाल्यां
वर्षान्तरं परीक्षा भवति, तया परीक्षया विद्या-
र्थिनां योग्यता सम्यक्तया न ज्ञायेत।
अस्याः परीक्षायाः परिणामस्तु सर्वत्र विलोक्यते
दृश्यते च, यत् ये विद्यार्थिनः परीक्षास्व-
नुत्तीर्णा भवन्ति ते आत्महत्यां कुर्वन्ति,
इति सर्वे जानन्त्येव। परीक्षायां दिवसेष्विदं
घटना समाचारपत्रेषु प्रायश आगच्छत्येव।
तृतीयस्तावत् - परीक्षाप्रणाल्यां यो विद्यार्थी
पठनेऽध्ययने चावर्षं सर्वतोऽग्रो भवति,

देवगोष्ठी

यदि स परीक्षाभवने समुपविश्य नियतसमयस्य-
मध्ये ऽकस्माद् व्याकुली भवेत्, तदा तस्य
परीक्षायामनुत्तीर्णं भवितुं भयं भवति। अन्य-
विधः, यो विद्यार्थी श्रेण्यां सर्वदा पठनेऽ-
ध्ययने च निर्बलो भवति, स प्रायशो दृश्यते
यदनुचितोपायानाश्रित्योत्तमाङ्कैः समुत्तीर्णो
भवति। अथ यदि आधुनिक परीक्षाप्रणाल्यां
यदि कश्चन विद्यार्थी सहसा रुग्णो भवेत्
परीक्षाकालेऽत्र, कामं भवतु श्रेण्यां पठने सर्व-
श्रेष्ठः, यदि स परीक्षाभवनं न गच्छति तदा
स तस्मिन् वर्षे परीक्षायामनुत्तीर्णोऽ
नुद्घोष्यते। परीक्षाप्रणाल्या ज्ञानं भवति
दोषकरं भाति!

एवमेव अनेके दोषाः सन्ति

देवगोष्ठी

अस्याः परीक्षाप्रणाल्याः परमहंसमधुना लोके-
प्रयसमर्थः।

अन्ते च वयमाशास्महे यत् भविष्यत्कालेऽस्माकं तन्त्रं कस्यचन वास्तविक-योग्यतां वीक्ष्यैव प्रमाणपत्रं दद्यात्। एषाऽधुनिकी परीक्षापद्धति दूषिता वर्तते। यदि वयं देशस्य, जातेः, समाजस्य च कल्याणं कर्तुं वाञ्छेम तर्ह्यस्माकं तन्त्रं तां दूषितां परीक्षाप्रणालीं सत्वरमेव परित्यजेत्। तदैव भारतदेशस्य वास्तविकोन्नति-र्भवितुमर्हति, अन्यथा न।

जितेन्द्रकुमार।

देवगोष्ठी

विश्वविद्यालयेषु शिक्षायाः माध्यमं हिन्दी स्यात्

अयमति विवादास्पदं विषयो यदास्मिन् भारत देशे शिक्षायाः माध्यमं हिन्द्याङ्ग्ल भाषयोः कतरत् स्यात् । यदि वयं निष्पक्ष दृष्ट्या विचारयेम तर्ह्येतद् निर्णीयते यदार्य भाषया एव शिक्षाया माध्यम रूपेण भवितव्यम् । या भाषा भाषा गुणै विभूषिता तयैव माध्यम रूपेण भाव्यम् । हिन्द्येवास्माकं राष्ट्रभाषा मातृभाषा चास्मिन् पदे स्थातुं योग्या । अस्या भाषायाः प्रचारः प्रसारश्च सर्व क्षेत्रेषु प्रचुर मात्रायां विद्यते । विदेशीया आङ्गलभाषा अस्याः साम्यं न विधातुं शक्नोति । आङ्गलानां शासन काल एवास्या जन्म भारत भूमौ बभूव । आङ्गला अति नीतिज्ञा निपुणाश्चासन् । ते विजानन्ति स्म यद् भारतीयान् पूर्णरूपेण स्व वशे नेतुं एषां संस्कृतेः सभ्यतायाश्च सर्वथा विलोपो विधेयः

देवगोष्ठी

लार्ड मैकाले महोदयेनैव यः तत्समयस्य शिक्षा शास्त्र्यासीत्, आङ्गलभाषायाः सर्वमहाविद्यालये एव निवार्यरूपेण पठनं संचालितम्। तस्यैव परिणामो यदद्यापि तद् भाषापाशेन निबद्धा वयं अनायासेनैव न विमुक्ता भवितुं शक्नुमः। अतोऽस्माभिरस्या स्तत् परित्याग एव विधेयः।
सर्वेष्वेव देशेषु निजभाषैव भवति। तदस्माकं देशे कथं विदेशीया काचिद् भाषा राज्यं करोति? सा तु सत्वरमेव परिहरणीया। केचिदेवं कुर्वन्ति नानया विनास्माकं सर्वमपि कार्यं सम्पन्नं भविष्यति विदेशैश्च सम्बन्धोऽपि विलुप्तो भविष्यति परं वयं विजानीमः परदेशेष्वपि स्वकीयैव भाषा समाद्रियते। विजयकल्पस्य उदाहरणस्य नास्त्यावश्यकता। तस्याः श्रीदेशोऽपमानो जातः विदेशे

अधुना वयं पश्यामो यदुत्तर प्रदेशे तु प्रायेण महाविद्यालयेषु हिन्दी माध्यमेनैव

देवगोष्ठी

पठनं भवति, तत्र च किमपि काठिन्यं नानुभूयते।
यद्यपि इङ्ग्लिश भाषायामस्माकं महत् साहित्यं निहितं विद्यते तथाप्यस्माभिः तत्समग्रस्य साहित्यस्य स्वभाषायां रूपान्तरं विधेयम्। परिश्रमस्य त्वावश्यकता वर्तत एव। एषा खलु धारणा यदियं भाषा वैज्ञानिकी न वर्तते मिथ्यैव एव। विद्यार्थिनां कृते प्रथमतस्त्वाङ्गल भाषा कठिना विद्यते, अपरतश्चेयं विदेशीया भाषा। मदनमोहनमालवीयस्य कथनमिदं यदाङ्गलभाषां सम्यग् विजानन्नप्यहं भाषणसमकाले बिभेमि यत् कुत्रचित् त्रुटिस्तु न जाता सत्यमेव विद्यते। अन्यच्च यदा अध्यापकमहोदय इङ्गलिश माध्यमेन पाठयति तदा विद्यार्थिनो मनो द्विभागयोर्विभक्तं भवति। प्रथमं तु स तस्य भाषां ज्ञातुं प्रयतते, तत्पश्चात् तस्य भावो ज्ञायेत। एवमियं विदेशीया भाषा विद्यार्थिषु भार एव। बहवो विद्यार्थिनस्तु केवलं रटित्वैवोत्तीर्णा जायन्ते। एतस्या-

देवगोष्ठी

अवस्थायां विद्यार्थिषु बलादस्यारोपणं न विधेयम्।
विद्यार्थिन आङ्गलभाषां पठेयुः परं माध्यमरूपेणास्याः
स्थिति र्न शोभते। हिन्दी भाषाऽति सरला मनोहारिणी
च विद्यते। रूपं रचनावशुद्धक वर्णविजिता,
व्याकरणदृष्ट्या निर्दोषा, अनेक गुणैः परिपूर्णा, राष्ट्र
भाषा पदे नियुक्तापि कथं न योग्या? अयं
तु मातृभाषायाः स्पष्टमपमान एव। सर्वत्र स्व-
भाषायामेव सर्वमपि कार्यं भवति। अन्यदेशेष्वपि
हिन्दी भाषा पाठ्यते परं स्वभाषामाध्यमेनैव।
एवमेवात्राप्याङ्गलभाषायाः चेत् पठनं स्यात् तर्हि
स्व भाषायामेव। अत्र ये विदेशीयाः समायान्ति
तेऽस्मदभाषामेवैषां ज्ञातुं प्रयतन्ते। केचिद्
देशा एतादृशा यत्र इङ्गलिशभाषायाः स्वल्पोऽपि
प्रचारो न विद्यते किं तत्रास्माकं सम्बन्धो
न जायते? भवत्येव। एवमन्यदेशैः सह इंगलिश
भाषया विनापि नूनमस्माकं सम्बन्धो भवितुं

देवगोष्ठी

शक्नोति । एवं आङ्ग्लानां कृते आङ्ग्लभाषा शोभते । हिन्दूनां कृते तु हिन्दीभाषैवोपयुक्ता । अधुना समस्येयं समुत्पद्यते, यत् चेत् प्रान्तीयभाषा एव माध्यमिकी भाषा स्यात् तर्हि को दोषः ? नूनमेवमपि भवितुं शक्नोति । यत्नेनापि समस्यायाः समाधानं न भविष्यति । इदमव्यवस्थाया हेतुरेव भविष्यति । अधुना तु छात्रवर्गः पठनकाले प्रान्तपरिवर्तनेपि किमपि काठिन्यं नानुभवति, यतो हि भाषाया माध्यमः प्रायेण समान एव । परं प्रान्तीयभाषायाः शिक्षाया माध्यमत्वात् इदं कर्तुं सर्वथा असम्भवमेव । कोपि प्रत्येकं प्रान्तस्य भाषां ज्ञातुं न समर्थः । इयमेव दशा अध्यापकानां कृते भविष्यति । अन्य प्रान्तं गते तत्कृते अध्यापने महत् काठिन्यं भविष्यति यतो हि तेन तु तत् प्रान्तस्य भाषा न विज्ञायते । अतः प्रान्तीय भाषापि कथमपि शिक्षाया माध्यमे नोपयुक्ता

भविष्यति । अन्ते चेदमेव निर्णीयते यद् या सर्वप्रिया, सर्वश्रेष्ठा, सर्वगुणसम्पन्ना, आर्यभाषेति नाम्ना च प्रतिष्ठा सैव हिन्दीभाषास्मिन् पदे स्थातुं योग्या । नान्या काचिद् विदेशीया भाषा ।

लेखकः
वेदप्रकाशः चतुर्दशीयः



देवगोष्ठी

महात्मा गान्धी

सत्यदेवो वासिष्ठः

सत्यमूर्तिर्दययार्द्रचित्तो
दरिद्रदीनार्तदशामवेक्ष्य ।
दीनोद्धृतौ यो नितरां तपस्वी
गान्धी महात्मा सकलैः स वन्द्यः ॥

श्रीमतो गान्धिनो विषयमादाय मनाक् प्रस्तूयते । यथा नलोऽयाचित वृत्तः सञ्जातो, युधिष्ठिरोऽजातशत्रुश्च योगिजनाः आत्मारामाश्च समजनि शत सञ्जायन्ते सज्जनिष्यन्ते, तथैवायं महाभागोऽपि महात्मेति नाम्ना प्रसिद्धिं गतः । पूर्वतं नामास्य मोहनदासकर्मचन्द गान्धीत्यासीत् । अस्य महात्मनो महाभागस्य जन्म काठियावाड प्रदेशे पोरबन्दर राज्ये नवषष्टि उत्तराष्टादशशततमे, ईश्वीयवत्सरे अक्टूबर मासस्य द्वितीये दिनाङ्के अभवत् ।

देवगोष्ठी

अयं महात्मा वर्तमानसमयस्यैका महती विभूतिरासीत् । अस्यैव महात्मनः प्रतापेन भारतवर्षं स्वाधीनं समजनितरामिति । सर्वेऽपि विजानन्ति किमधिकाधिकेन जल्पनेन । अनेन महात्मना देशसेवायामनेकानि वर्णनातीतानि — कष्टानि समनुभूतानि ।

अस्य महात्मनः शरीरपोषणम् पालनञ्च रूढिगत धार्मिक विचार परिपूर्णे वातावरणे बोभवीति स्म । अस्य जननी सरलस्वभावासीत् । अस्य महाभागस्य परिवारे जैनधर्मे दीक्षिताः सर्वे एव प्राणिन आसन् । इदमेव प्रधानं निदानं यदस्य महात्मनो जीवनेऽहिंसायाः प्रमुखस्थानमासीत् ।

गांधिमहाभागस्य शिक्षाया आरम्भः पोरबन्दरस्यैकस्मिन् विद्यालये सञ्जातः, एष च महात्मा पठने लेखने च मन्दो लज्जाशीलश्चासीत् । ईषदनन्तरं समयानन्तरमस्य जनको राजकोटं गतवानासीत् ।

देवगोष्ठी

तत्र चास्य शिक्षायाः सुप्रबन्धः समजनिष्ट । राजकोटे वर्षत्रयं यावत् अधीत्यानेन त विद्यालये मैट्रिक परीक्षा प्रादायि । तत्र च सफलतानीता। तस्मिन्नेवावसरे त्रयोदशवर्षवयस्यस्य विवाहो जातः । जनके स्वर्गं गते सति सप्ताशीत्युत्तराष्टादशशततमे ख्रीष्टाब्देऽयं महाभागः इंग्लैण्डदेशं गतवान् । तत्र च वैरिस्टरी परीक्षामुत्तीर्य प्रत्यागतः । राजकोटमागत्य गान्धिमहाभागेन वाकीलतायाः कार्यं प्रारब्धम्, परन्तु तस्मिन्कार्ये स सफलो नाऽभवत् । तस्मिन्नेवावसरे पोरबन्दरस्थेन व्यापारगृहेण वाकीलतायै दक्षिणाफ्रीकां स प्रेषितः ।

तत्र गौराङ्गशासनान्तर्गतानां भारतीयानां दुर्दशां वीक्ष्यानेन तत्रत्यशासनस्य विरोधे सत्याग्रहः प्रारब्धः, अन्तेऽस्य महाभागस्य सत्याग्रहः सफलतां गतः । यदा चतुर्दशोत्तरैकोनशततमे ईश्वीय अफ्रिकातः स भारतमागतवान् । तदा भारतीय जनता अस्य

देवगोष्ठी

हार्दिकं स्वागतमकरोत् । अत्रापि भारतं स्वतन्त्रं विधातुमयं महाभागः प्रयत्नं कर्तुं प्रारब्धवान् । प्रारम्भे बिहारप्रान्तान्तर्गत चम्पारने कृषिकर्म कुर्वाणानां जनानां प्रश्नमादाय गौराङ्गानां विरोधेऽयं महाभागः सत्याग्रहमकार्षीत्, अपूर्वसफलताञ्च प्राप्तवान् । इत्थं समस्ते देशेऽनेके वारमनेकत्र सत्याग्रहा समजनिषत । कारागारेषु स्त्रीपुरुषसहस्राणि लक्षाणि च प्रविष्टान्यासन् । अस्य महाभागस्यैव प्रयत्नेन सप्तचत्वारिंशदुत्तरैकोनविंशतिशततमे ईशवीय संवत्सरे अगस्तमासस्य पञ्चदश तारिकायां भारतं सर्वथा स्वतन्त्रमासीत् ।

भारतीय स्वतन्त्रतायुद्धे हिन्दुमुस्लिमयोरेकतामपि विधातुमनेन प्रयतितम् । परन्तु दौर्भाग्यवशात् अस्मिन् कर्मणि स महाभागः सफलतां न गतः । भारत-

देवगोष्ठी

विभाजनावसरे पाकिस्ताने हिन्दूनामुपरि मुस्लिमपदवाच्यैरनेकै घोरा अत्याचाराः सम्पादिताः तदापि शान्तिपाठं पाठयन्तमेनं पञ्चत्रिंशतवर्षवयस्को नाथूराम "गोडसे" नामक एको महाराष्ट्रियो नवयुवको अष्टचत्वारिंशदुत्तरैकोनविंशतिशततमे वर्षे जनवरी मासस्य त्रिंशततमे दिनाङ्के सन्ध्यासमये विरलामन्दिरे प्रार्थनायै गच्छन्तं महाभागं पीस्तौलकास्त्रेण (पिस्तौल इति हिन्दी भाषायां) अवधीदिति।

भवत्येवैवं मुनेरपि वनस्थस्य -
स्वानि कर्माणि कुर्वतः।
उत्पद्यन्ते त्रयः पक्षाः -
मित्रोदासीन शत्रव इति।

वस्तुतोऽस्य महाभागस्य देशतो गमनं देशाय कल्याणकारकं

देवगोष्ठी

नाऽभवत् । किं पिष्टपेषणेनेति । शुद्ध-
बुद्धमुक्तपरमेश्वरः तस्यात्मने शान्तिं प्रद-
द्यादिति विलिख्य समाप्यते ।



देवगोष्ठी

पत्रिका-प्रशस्तिः

सुललित सुमधुर कृतिभिश्चित्तं हरति ममेयं पत्रिका ॥

अत्र मञ्जुलाः कला लसन्ति
सरसाः कविता नवाः स्फुरन्ति
रूपमुदारा नया भवन्ति
हरति च पाठकचित्तं सुन्दरसूक्तिसरोजैः पत्रिका ॥१

पाठकचित्तं हरति सुलेखैः
काव्यालापैर्मधुर कथाभिः
नव्य पुरातन भव्य विचारैः
तुले सदेयं नवुते सत्साहित्य कलापं पत्रिका ॥२

रूपासुन्दर भाव [illegible] विकासं
नूतन शुभ वि[illegible] विलासं
संस्कृत भाषा रम्य वितानं
कृत्वा विद्वन्मानस[illegible] जयति सदेयं पत्रिका ॥३

अत्र सुरभि[illegible]ां वै प्रीतिः
पत्रे पत्रे [illegible]ा रीतिः ।

देवगोष्ठी

धात्रोत्साह विकासो नीति-
नूतनरसपीवाह विसारैः हरति मनो मे पत्रिका ॥४
मनसि सुचिरमानन्द विकासं
सुरभाषासत्कार विलासं
कां कामियं जयतादिह
शिवशंकर निःसीम कृपातः कुले सदेयं पत्रिका ॥५
हरिता भरिता पल्लवितेयं
सदा कुसुमिता सुरभिप्लुतेयं
रसलोलुप कवितृप्तिकरी स्यात्
गुरुकुल बटुजन-कीर्तिपताका चारु लालनी पत्रिका ॥६

कोविद प्रवरः -
श्रीमान् रामनाथो वेदालङ्कारः

देवगोष्ठी

सम्पादकीयम्

__संस्कृतस्य माहात्म्यम्__ — को नाम मतिमान् पुमान्न वेद सुरगिरः संस्कृतभाषायाः माहात्म्यं — '__जननी जन्मभूमिश्च स्वर्गादपि गरीयसी__'ति कस्यापि कविवरेण्यस्य सुललित-वचनेन देववाण्या अत्युच्चं गौरवमयस्थानं वरीवर्ति सर्वासां भाषाणां जननीत्वात्। यादृशं महत्साहित्यमस्या भाषायाः वर्तते न तादृशमन्यासां भाषाणाम्। वाल्मीकि-व्यास-माघ-कालिदास-भवभूति प्रमुखैः कविवरैः विरचितानि रुचिराणि कमनीयानि महाकाव्यानि नाटकानि च गौरवमस्याः स्थापयन्ति पौनःपुन्येन। इयं भारतवासिनां प्राचीन धार्मिक साहित्यस्य संरक्षिका।

देवगोष्ठी

ब्राह्मणस्मृत्यर्थशास्त्रज्योतिषायुर्वेदादीनां विद्याः गीर्वाणवाण्यामेवास्यां विद्यन्ते। निखिलधर्मस्य मूलभूताः ऋग्वेदादयश्चत्वारो वेदा अपि अस्यामेव शोभन्ते।

संस्कृतस्यैतत् महत्त्वं विलोक्यैव अस्माकं सर्वकारः देवगिरः प्रचाराय प्रसाराय च निरन्तरमेव क्रियात्मकं कार्यं विदधाति। स्थाने २ संस्कृतविश्वविद्यालया निर्मीयन्ते। नगरे २ संस्कृतविद्यालयानां महाविद्यालयानाञ्च स्थापना भवन्ति।

सर्वेषु गुरुकुलेषु संस्कृतस्य प्रसारायोन्नत्यै च प्रशंसनीयं कार्यं क्रियते। गुरुकुलेष्वपि च गुरुकुल कांगड़ी विश्वविद्यालयस्य विशिष्टं स्थानं वरीवर्ति। अस्माकं सौभाग्यमस्ति यत्तत्राधीयमाना वयं संस्कृतभाषा-परिचयं प्राप्नुमः।

→

देवगोष्ठी

— पत्रिका —

सहृदयाः पाठकाः - विंशतिवर्षानन्तरं संस्कृतोत्साहिनी परिषदः देवगोष्ठीति पत्रिकायाः प्रथमाङ्कं प्रकाशयन्तोऽत्यधिकं मोदं वयमनुभवामः। आसीत् तीव्राकांक्षा यत् सम्यक्तया सम्पादनं कृत्वा वयं प्रकाशयेम। यद्यपि सा पूर्णा न जाता तथापि योऽपि स्वल्पः प्रयासः कृतोऽस्ति स तत्र भवतां सम्मुखे वर्तते एव। अस्य प्रथमाङ्कस्योपादेयतायाः निर्णयस्तु भवद्भिरेव विधास्यते। वयमाशास्महे भवन्तः अस्याङ्कस्य समालोचनां विधाय बहुमूल्यान् परामर्शान् प्रदास्यन्ति येन द्वितीयाङ्कः इतोऽप्यधिकं परिष्कृतरूपे प्रकाशितः स्यात्।

अत्रास्माभिः सभाया इतिहासे दृष्टिपातः क्रियते एव। गुरुकुलस्थापनया सहैव संस्कृतोत्साहिनी परिषद् उद्भवो जातः। येन त्रिंशतिवत्सरान् यावत् सततमेवोन्नतिः कृता परिषदा छात्राणां संस्कृतविषये विशेष-

देवगोष्ठी

निकासोऽभूत् । परं तदनन्तरं अधःपतनम् सञ्जातम् परिषदः । मध्ये तु नाममात्रमेवावशिष्टमासीत् । इतः वत्सरद्वयं प्राक् इयं सभा प्रायशः वाग्वर्धिन्याः आधीने आसीत् । १९५७ खीष्टाब्दे रोहतक नगरे या संस्कृतभाषण प्रतियोगिताऽभूत् तत्कृते प्रशान्तकुमारकुमारौ वाग्वर्धिन्या एव प्रेषितौ अस्माभिः । आभ्यां छात्राभ्यां विजयोपहारः पुरस्कारद्वयञ्च विजितमासीत् । १९५८ खीष्टाब्दे इयं सभापि स्वतन्त्राऽभूत् । तस्मिन्वर्षे कुमारवेदौ रोहतकनगरे प्रेषितौ आस्तां ताभ्यां च विजितः विजयोपहारः । तस्मिन्नेव वर्षे परिषदा श्रद्धानन्द सप्ताहे प्रसन्नराघवस्य चतुर्थोऽङ्कः अभिनीत आसीत् । तस्मिंश्च कुमारवेदज्ञानानन्दवेदव्यासादिच्छात्रैः भागो गृहीत आसीत् । १९५९ तमे वर्षे पुनरपि वेदकुमारौ रोहतक नगरं, दिल्लीनगरं च प्रेषितौ आभ्यां एकः विजयोपहारः पुरस्कारपञ्च विजितम् ।

देवगोष्ठी

तस्मिन्नेव वर्षे परिषदा पञ्चदशवत्सरानन्तरम-
खिल भारतीय संस्कृत संभाषण प्रतियोगितापि
आयोजिताऽऽसीत् । एवं क्रमशः विकासो भवति
सभायाः एवं विघ्नं विकासं
विलोक्य छात्राणामुत्साहञ्च दृष्ट्वा गुरुवर्यैः प्रीतिः
वर्षानन्तरं देवगोष्ठीपत्रिकां प्रकाशयाम । इदानीं
प्रतिपक्षं सम[आवश्यकं]भवति । अस्मिन्वर्षे यतः अङ्कमेतं
अवश्यमेव प्रकाशितव्य इति योऽवास्माकं सुदृढो
निश्चयः, श्रद्धानन्द सभागृहे प्रतियोगितया सह
किमपि नाटकमपि सुनिश्चितमेव अभिनीतं
भविष्यति ।

आगामिनि विजयदशमी पर्वणि
प्रतियोगितारूपेण आयोजनम् अस्माभिः क्रियते
तस्मिन्नेव भवन्तः ज्ञास्यन्ति अस्माकं प्रयत्नं
छात्राणामुत्साहञ्च ।

धन्यवादाः

अन्ते चाहं वयं गुरूणां चरणेषु धन्यवादान् अर्पयामः। यैः प्रेरिता वयं संस्कृतोन्नतिं प्रतिकृतसंकल्पाः स्म। विशेषतश्चाहं धन्यवादं करोमि श्रीमतां पूज्यचरणानां धर्मदेव वेदवाचस्पति महोदयानां यैर्हि स्वामूल्यान् परामर्शान् देवगोष्ठी विषये श्लोकान् लेखने च दत्वा सुविशेषं वयमनुगृहीताः स्म। आशास्महे तेषां सहयोगोऽस्माकं सदैव पथप्रदर्शनं विधास्यति। एतदतिरिक्तं श्रीमतां हरगोपाल महोदयानां, श्री विद्वद्वराणां धर्मदेवविद्यामार्तण्ड महोदयानां, श्रीमतां [illegible] महोदयानाञ्च वयं तेषां सहयोग कारणात् विशेषं धन्यवादान् दद्मः। इत्थं प्रकाशचन्द्र महोदयोऽपि धन्यवादं न विस्मरामः।

वयं लेखकानां सकल छात्राणां अपि धन्यवादं कुर्मः। छात्रेषु सर्वाधिक साहाय्यं एकादशश्रेण्याश्छात्रेण महावीरेण कृतं अतस्तस्मै पौनःपुन्येन धन्यवादान् दद्मः।

देवगोष्ठी

आशास्महे यदस्माकं प्रयासस्य स्वागतं कृत्वा भवन्तः सर्वे उत्साहमस्माकं वर्धयिष्यन्तीति । आशास्महे यत् गुरुवर्याः मार्गप्रदर्शनैरस्माकं सहयोगं करिष्यन्तीत्यलमति विस्तरेण ॥

देवगोष्ठी

देवगोष्ठी

सम्मतयः

देववाणी प्रख्याते ऽस्मिन् गुरुकुले विंशतिवर्ष-पर्यन्तं संस्कृतपत्रिकायाः आर्य भारती विद्याकर्षक विततां वैभवमनुभवामि। विद्यालयस्य स्नातकस्याद्धतार-मिल्यन्ति सनुलिले कुसलमायाति: देवगोष्ठी पत्रिकायाः सम्पादनभारस्य निभालोक्य किञ्चित्सन्तुष्टमपि मे चेतः। पत्रिकेयमियतेव सम्पादितं देवगोष्ठ्यां तत्प्रगति-पूर्णं प्रमाणं च वर्तते। अस्याः पत्रिकायाः लेखकैः गुरुकुल-पत्रिकायां स्वलेखानि प्रकाशनाय प्रेषणीयानीत्यपि मे परामर्शः। उद्देश्यमिदमवलम्ब्य गुरुकुल पत्रिकायाः प्रकाशनं भवतीति, संस्कृतभाषायाः प्रचारणम्। देवगोष्ठ्याः उपक्रमः आगामि प्रगतिपथगामी स्यादित्यस्ति मे ऽभि-लाषा।

सत्यव्रतः

२२-५-६०

देवगोष्ठी

वैदेशिकानां पदतलतापाशान्मुक्तो
ऽस्माकं देशः शनैः शनैः प्रकाममेव
प्रागनुभूतां फलानि अनुभवति किन्तु
न देशस्यास्य मनोऽभिलाषो भवेत्।
सा चोन्नतिः न केवलं भौतिकोन्नत्या
सम्भवति, परं परापराविद्ययोः
सम्यगध्ययनेन अनुष्ठानेन च साध्या
इति परेषामर्वाचां च विदुषां मतम्।
स्वकीयज्ञानवाङ्मयाध्ययनाय
देववाणी परमं साधनम्। तदर्थमि-
यमाकृतिः; छात्रैः, योऽयं उत्साहः
अस्यां देवगोष्ठ्यां प्रदर्शितः, स
नितरामभिनन्दनीयः। स च दीर्घ-
कालं निरन्तरासेवितः प्रचलतु
अभिवर्धयेत् - इति मत्वा पत्रिकायाः-
गताभिरुचि छात्रैः अनवद्येयं
अनुसरणीयः। एतैः सञ्चयप्रकाशनाय
सम्पादको लेखकश्च साधुवादपात्राणि
शुभाशीः भवन्तानि चलिति। धर्मेन्द्र वेद-
वाचस्पति

देवगोष्ठी

साधु प्रयतितम्। देवगोष्ठी सादि समध्यं सान्तञ्च सम्यक् पठिता मया। साधुवादमर्हतितमां सम्पादक०।

शुभाशिषः। जनमेजय० विद्यालंकार०

गुरुकुल कांगड़ी विश्वविद्यालयः — २४-९-'६०.

श्रीमान् - जनमेजयो विद्यालंकार

देवगोष्ठी

सुदीर्घं कालं यावत् प्रमुखा देववर्ग-
स्य पुनर्जागरितेच्छा [illegible] महत्त्वं प्रकां-
दर्शयन्तीति मम मतम् । अस्मिन् सन्-
प्रभातेऽस्मिन् [illegible] संस्कृतलितादिनी [illegible]-
[illegible] : [illegible] अर्हिता/
नियमितरूपेण गोष्ठ्यां लोकानां [illegible]-
[illegible] संस्कृतसारं, [illegible],
[illegible] शैली चैतन्यसर्वं [illegible]-
[illegible] । गोष्ठ्या अतिरेक अर्थं
प्रकाशिताः [illegible] लोकाः [illegible]-
[illegible] सर्वे: सुलभ पूर्णाः सौष्ठव-
[illegible] । इमम् [illegible] नि-
[illegible] मनसुख[illegible] । आवासे पदाभ्या
[illegible]
[illegible] । आवासे च गोष्ठी

देवगोष्ठी

दूरादाकृष्य सर्वान् गुणरसिकजनान् स्वादुभिः मोदयन्ती
भूमौ नान्धाधिकारं तिमिरमपि घनं ज्योतिषा वारयन्ती।
तत्त्वान्वेषैर्नवीनैर्बुधजनहृदयं नित्यमुद्भासयन्ती
कल्याणानां वितानं दिशि दिशि तनुतामुज्ज्वलं देवगोष्ठी॥

बुद्धदेवः
१७-९-६०

श्रीमान् बुद्धदेवो विद्यामार्तण्डः

प्रकाशनानन्तरं प्रमुखकार्यः प्रचलि-
[illegible] न [illegible] पुनः [illegible]
विच्छेदम्। अतीव मनोहारित्वात् [illegible]
[illegible] प्रकाशनं [illegible]
[illegible] ‘यतीन्द्र’।
सुयशः
2.10.60

देवगोष्ठी

यदा वयं गुरुकुले स्म तदा संस्कृत-हिन्दी बालभाषा-
मासिक पत्रिका प्रकाश्यते स्म। मम छात्रा
अस्मिन् रुचिं प्रदर्शयन्ति स्म। अद्य अवस्थिता-
लब्धानां अहं गुरुकुलछात्रैः प्रकाशितां
देवगोष्ठी पत्रिकां दृष्टवानस्मि। यां दृष्ट्वा अत्यन्तं
आल्हादोऽभूत्। एतदर्थं च धन्यवादार्हाः
साधुवादार्हाः सन्ति। आशासे अस्यां दिशि
ब्रह्मचारिणः इतोऽप्यधिकं रुचिं प्रदर्शयि-
ष्यन्ति।

यशःपाल विद्यालङ्कारः
१ 9/80
मुख्याधिष्ठाता कन्या
गुरुकुल देहरादून

देवगोष्ठी

समाचार-समीक्षा

गुरुकुल समाचाराः गुरुकुले चिरकालानन्तरं विश्व-विद्यालय-व्याख्यान मालाया आयोजनं कृत्वा, अत्यधिकं प्रशंसनीयं कार्यं कृतमस्माकं पूज्य-राचार्यवर्यैः। विश्वविद्यालयस्य लाभ एवायं यदत्र सर्वविषयेषु छात्राणां प्रवेशो जायते। अत्रास्माकं परामर्शोऽस्ति छात्राणां कृते यत उत्साहशालि विविधविषयकाणि भाषणानि श्रुत्वा लाभं प्राप्नुयुः। भाषणविषयेष्वस्माकं मतं यत्तानि सामान्यहिताय स्युः॥

— आश्रमस्थ-सभानां कार्यम् —

अस्मिन्वर्षे सर्वासामाश्रमस्य-सभानां कार्यं प्रशंसनीयं वर्तते। प्रतिशनि-वासरं वाग्वर्धिन्याः सभायाः कोऽपि कार्यक्रमो

अवश्यमेव भवति। संस्कृतोत्साहिनीपरिषदः, "इंगलिश लिटरेरी" इत्याख्याश्चापि प्रतिपक्षं कार्यक्रमा भवन्ति। एतैः कार्यक्रमैः छात्राणां भाषणशक्तेर्विकासः सततं भवत्येव।

← गुरुकुल-पत्रिका →

गुरुकुल पत्रिकायाः हिन्द्या देववाण्यां रूपान्तरमति प्रशस्यं वर्तते। एतस्मिन्समये भारतसर्वकारोऽपि संस्कृतस्य महत्वं विज्ञाय तस्य प्रचारदिशायां साधु-प्रयत्नं नितान्तमेव करोति। गीर्वाणवाणी-प्रचारेऽयमस्माकं गुरुकुल पत्रिकापि प्रशंसनीयं साहाय्यं प्रदास्यतीत्याशास्महे।

— शोकसमाचारः —

गतागतमासस्य त्रिविंशति-थौ गुरुकुलस्य सर्वप्रथमस्य प्रतिष्ठितस्नातकस्य राजनीतिनिष्णातस्य, महासाहित्यकारस्य, गुरुकुलमातृभक्तस्य उपकुलपतेः श्रीमतः इन्द्रविद्यावाचस्पति महो-

देवगोष्ठी

दयस्य देहान्तोऽभूत् । तस्मै महापुरुषाय श्रद्धाञ्जलीनर्पयन्तो वयं प्रार्थयामहे भगवन्तं यत्तस्य आत्मा स्वर्गेऽपि शान्तिं प्राप्नुयात्, अस्माकं कं शिष्याणां सुविमलानि चरितानि विलोक्य ।

— विश्व दर्शनम् —

नवप्रान्तः

गतमासे भारते एकस्य नूतनस्य प्रान्तस्य स्थापनाऽभूत् योहि "नागालैण्ड"नाम्ना ख्यातः । शान्ति स्थापनाय कृतोऽयं भारतस्य सर्वकारस्य प्रयत्नः प्रशंसनीय एव ।

— पशूनामन्तरिक्ष-यात्रा —

गतमासे जगत्प्रसिद्धेन रूस-देशेनान्तरिक्षे स्वकीयं राकेट यन्त्रं प्रेषितं यस्मिन् कुक्कुरादय प्राणिन आसन् । विज्ञान-स्यायं चमत्कारः कुत्र चमत्करिष्यते ।

— — — — -

देवगोष्ठी

← सन्धिः →

ज्येष्ठमासस्य एकोनविंशतितिथौ भारतस्य पाकिस्तान-देशेन सह कुल्यानां नदीनाञ्च जलस्य-विषये सन्धिरभूत् । ~~सन्धि~~ तदनुसारं भारतं एकनिश्चितमवधिं यावत् पाकिस्तान देशाय स्वनदीनां जलं प्रदास्यति । यदा स कुल्यानां निर्माणं करिष्यति तदा त्रिषु नदीष्वस्माकमेव अधिकारो भविष्यति ।

— निःशस्त्रीकरण वार्ता —

अस्मिन्समये संयुक्तराष्ट्रसङ्घे निःशस्त्रीकरणप्रश्न विषये विवादः प्रचलति । रूसादि देशानां प्रधानमन्त्रिणः समागताः ।

— रोमदेशे विशालक्रीडाङ्गनम् —

रोमदेशे ओलम्पिक क्रीडाः समाप्ताः जाताः नवतिप्रायैः देशैः भागो गृहीतः आसीत् । रूसदेशेन सर्वाधिकानि स्वर्णपदकानि (त्रिचत्वारिंशत्) विजितानि । अमेरिका-देशस्य इटलीदेशस्य च क्रमशः द्वितीयं तृतीयं

देवगोष्ठी

च स्थानमासीत् । शोचनीयासीत् भारतदेशस्य दशा दौर्भाग्यमस्माकं भारतीयानां यत् इतः द्वित्रिंशद्वत्सरान् यावदस्माकं देशः हाकी क्रीडायां विश्वविजयी आसीत् । परमस्मिन्वर्षे गतं स्वर्णपदकं पाकिस्तान देशं प्रति । एकं रजतपदकमेव विजितं भारतेन ।

अत्र विषयेऽस्माकं परामर्शो वर्तते यत् भारतसर्वकारस्य कर्तव्यमासीत यत् स क्रीडाक्षेत्रे उन्नतिं कर्तुं क्रीडकानां शिक्षणाय अधिकाधिकं व्ययं कुर्यात् येन वयमपि अन्येषां देशानां पुरतः स्थातुं समर्था भवेम । हाकी-क्रीडाविषये तु अस्माकं सम्मतिरस्ति, अस्मात् वत्सरादेव पञ्चविंशति क्रीडकानां निर्वाचनं विधाय तेषां सततमभ्यासं कारयेत्, येन आगामिनि वत्सरे "जकार्ता" नगरे वयं पुनः स्वप्रतिष्ठितं स्थानं प्राप्नुयाम । जापानराजधान्याः "टोक्यो" नगरस्य ओलम्पिक क्रीडायां च पुनः अस्माकं देशो विश्वविजयी भवेत् इत्यलं विस्तरेण ॥

— व्रजेशकुमारः —